The author in this paper examines the nature of the experience of *rasa* with reference to the simultaneous different conditions of *citta*.

(क)

'विभावानुभावव्यभिचारि संयोगाद्रसनिष्पत्तिः", इति प्रसिद्धरससूत्रस्य व्याख्यातारो भवन्ति प्रभाविताः स्वस्वदर्शनमान्यताभिः। किन्तु, साङ्ख्यानुयायिनो व्यतिरिक्तं, ते सर्वे मन्यन्ते यद् रसानुभव आनन्दमयः। अपि च, रसानुभूतिकाले भावकस्य सामाजिकस्य वा चित्तस्य दशास्ति न तु एकवचनात्मिका, अपितु बहुवचनात्मिका। अस्माकं वर्तमानं प्रयोजनं रसानुभवस्य स्वभावस्य परीक्षणं चैत्तिकदशानां सन्दर्भे।

भट्टनायकाचार्येण संक्षेपतो निरूपितं यद् रसः समुपजायते सामाजिकस्यान्तश्चित्ते सत्त्वोद्रेकस्थितौ ; यत् स भवति स्वप्रकाशानन्दमयश्च तथा जनयति विश्रान्तिमन्तः-करणे। तत्पश्चादभिनवगुप्तपादेनापि प्रतिपादिता रसानुभवस्यानन्दस्वरूपता शैव-दर्शनमान्यताया आलोके। परन्तु, सर्वाधिकं प्राञ्जलं निरूपणमेतद्विषये वर्तते कविराजविश्वनाथस्य यद् भजते लोकप्रियतां रसानुरागिनां मध्ये, यथा—

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥"

(साहित्यदर्पणे, ३/२३)

अत्र कथ्यन्ते सुव्यक्तं रसानुभूतेः प्रकाशानन्दमयत्वं, चमत्कारित्वमखण्डत्वञ्चा पण्डितराजेनापि "रसो वै सः" इति श्रुतिमवलम्ब्योऽपादितं रसस्यानन्दमयत्वम्। आचार्यरूपगोस्वामिनापि ख्यापितमन्तिमविश्लेषणे रसस्य सुखमयत्वं यतो हि सर्वरसानामाधारो भवति मूलतो भगवान् श्रीकृष्णोऽखिलरसामृतसिन्धुः। प्रारम्भे स वदति यत् काव्यसुलभोनपञ्चाशद् भावानां कतिपये "शीताः" अथवा सुखमयाः, कतिपये "उष्णाः" अथवा दुःखमयाश्च यतो हि ते सर्वे संभवन्ति त्रिगुणेभ्यस्तु। अर्थात् यद्यपि भावानां प्रकृतिः सुख-दुःखात्मिका, तथापि तेभ्यो जायमाना रसाः सुखात्मका एव तथा च रसः समग्रतो भवत्यखण्डोऽविभाजेयः इति मतं स्थापितं परिनिष्ठिताचार्यपदव्याम्।

किन्तु चैत्तिकदशावैविध्यमपि स्वीक्रियते एभिराचार्यैः रसानुभवकाले। प्रत्यक्षतो "वदतो व्याघातो" लक्ष्यते अस्यां द्विविधात्मिकायां स्थितौ। सुतरां सा परीक्षार्हा।

(ख)

द्रुतिविस्तारविकासाख्यानि त्रीणि लक्षणानि निरूप्यन्ते भट्टनायकेन रसाभोगस्य। इमानि सिद्ध्यन्ति परमार्थतः चित्तस्य दशाः। स संयोजयति सम्भवमासां सत्त्वस्योद्रेकेण रजस्तमसोऽनुवेधसंवलितेन। दशरूपके विकाशविस्तारक्षोभविक्षेपाख्याः चतसृश्चैत्तिकदशा निर्दिष्टा रसकाले। प्राह धनिको यत् यद्यपि रसास्वादः तत्त्वतः समसमानोऽनन्यरूपो, तदपि नियतविभावादिकारणेन चित्तस्य चतस्रः दशाः समुपजायन्ते भिन्नभिन्नरसेषु, यथा विकाशः श्रृङ्गारहास्ययोः, विस्तारो वीराद्भुतयोः, क्षोभो बीभत्सभयानकयोः तथा विक्षेपो रौद्रकरुणयोः। विश्वनाथेन ज्ञाप्यन्ते काठिन्यदीप्तत्वविक्षेपद्रुतिनामकाः चतस्रः चित्तदशाः रसानुभवकाले, यथा—काठिन्यं वीरादिषु, दीप्तत्वं रौद्रादिषु, विक्षेपोऽद्भुतहास्ययोश्च। द्रुत्याविर्भावो निर्दिश्यते तेन सम्भोगश्रृङ्गारे, करुणे, विप्रलम्भे, शान्ते चाधिकाधिकमुत्तरोत्तरक्रमेण।

विश्वनाथस्य निरूपणमर्हति परीक्षणमत्र। स मनुते चित्तं निसर्गतः कठिनं तथा प्रतिपादयति प्रादुर्भावं एवं विधानाविष्टचित्तदशाया वीरादिरसेषु। परमिदं कथनं न हि तर्कसंगतं मनःशास्त्रानुसारेण। तथ्यमिदं यद् यदा कदाचित् संसर्गमवाप्यते कस्यचनोत्तेजनस्य, तदा कोऽपि विकारः संजायते नूनमस्माकं चित्ते। उत्साहो वीररसस्य स्थायिभावः। स, प्रतिपादयति विश्वनाथः, प्रादुर्भवति विनयपराक्रमशक्तिप्रतापादिविभावैः। अग्रे निर्दिश्यते तेन यद् "विजेतव्यं" वीरस्यालम्बनम्। तर्हि प्रश्नमुपस्थीयते निसर्गतः—अपि न कापि प्रतिक्रिया सम्भविष्यति प्रमातृचित्ते एवं विधोत्तेजनेभ्यः ? अत्र स्वीकारात्मकमुत्तरं न शक्यते खण्डयितुम्। तस्मादनाविष्टकठिनतायाः निरूपणमनर्गलम्। अत एव चित्तस्य काठिन्यं रसानुभवकाले न माननीयम्।

चित्तस्य विस्तार उद्दिश्यते धनञ्जयेन वीराद्भुतप्रसङ्गेषु । विस्तारो द्योतयति वितति प्रसृतिं वा यस्मादियं व्यञ्जना निःसरति यदनयोर्रसयोः सहृदयस्यान्तश्चित्तं भजति प्रसारं, परित्यज्य स्वसङ्कुचितसीमाम् । अर्थात्, यथा वीरे तथाद्भुतेऽपि प्रमातुः समग्रमन्तःकरणं लभते प्रसारं वैशद्यञ्च । प्राह विश्वनाथो यच्चित्तविक्षेपो घटतेऽद्भुते । इदं कथनं युक्तिविच्छिन्नं यतो हि विक्षेपतो द्योतयति विबलवतां या न संभवति विस्मयस्याविर्भावे योऽद्भुतस्य स्थायी । अनेन चित्तविस्तारो माननीयोऽद्भुते यथोक्तं धनञ्जयेन । अस्मन्मते तु, विक्षेपः संभवति केवलं रौद्रकरुणयोः यतो ह्यनयोः स्थायिनी, क्रोधश्च शोकश्च, उभौ क्लेशकारिणौ ।

विश्वनाथो मनुते चित्तस्य दीप्तत्वं रौद्रे । दीप्तत्वं सूचयति प्रज्वलन-मुत्तेजनं वा । उत्तेजितत्वेऽपि विद्यते विक्षिप्त वस्यानुवेधः । सुतरां रौद्रे स्वीकरणीया विक्षेपदीप्तत्वयोर्यौपदिकाः स्थितिः । बीभत्से भयानके वा क्षोभस्योदयः सद्यो माननीयः । मौनमवलम्ब्यते विश्वनाथेनानयोर्रसयोर्विषये । धनञ्जयो मनुते विकासं शृङ्गारहास्ययोः । विकासो द्योतयति मुकुलस्य प्रसन्नं विकसनं पुष्परूपे । अर्थात्, मानसो हर्षः सूच्यते विकासेन । अनेनानयोरुभयोर्रसयोस्तु विकासस्य प्रसक्तिः स्वीकरणीया ।

इदानीं विश्वनाथस्य "द्रुतिः" विचारमपेक्षते । तस्यानुसारेण, सहृदयस्य चित्तस्य द्रवीभवनं घटते रत्याद्याकारानुविद्धानन्दोद्बोधवशात् । इयं द्रुतिः सम्पद्यते अधिकाधिकं क्रमशः शृङ्गारे, करुणे तथा शान्ते । किन्तु, शान्तो न स्वीक्रियते धनञ्जयेन । शृङ्गारे विकासः, करुणे विक्षेपश्चेति स मनुते । किन्तु, अस्मन्मते तु, हर्षसूचको विकासः सम्भोग शृङ्गारे एवं द्रुतिर्विप्रलम्भे माननीया । शोकस्थायिके करुणे द्रुतिश्च विक्षेपश्च स्वीकरणीये युगपद् यतो हि यावत् प्रमातृचित्ते जनयन्ति वैक्लव्यादिविकारानेवंविधप्रसङ्गाः एकतः, तावत् ते द्रावयन्ति सहृदयानां चित्तमप्य-परतः । शान्ते द्रुतिः द्रवीभावो वा सञ्जायते, इत्यस्मदीयोऽनुभवः ।

अथोपरिगतविवेचनालोके, विभिन्नचैत्तिकदशानामाविर्भावः स्वीकरणीयो निम्नवत्—

शृङ्गारे विकासश्च द्रुतिश्च
हास्ये विकासः
रौद्रे विक्षेपश्च दीप्तत्वञ्च
वीरे विस्तारः
अद्भुते विस्तार;
बीभत्से क्षोभः (व्याकुलीभावः)

भयानके क्षोभः (अशान्तिः, कम्पनमादि)

करुणे द्रुतिश्च विक्षेपश्च

शान्ते द्रुतिर्दुतिः प्रकर्षो वा ।

इदानीं रसद्वयं (वात्सल्यं भक्तिश्च) अवशिष्यते । वात्सल्ये द्रुतिश्च विकासश्च, तथा भक्तौ द्रुतिः स्वीकरणीया, इति मन्यामहे वयम् । अथ समासतः, विकास-विस्तारविक्षेपक्षोभद्रुतिदीप्तत्वानां षट् चैत्तिकदशा उद्भवन्ति रसानुभवकाले विभिन्नरसानुसारेण । उल्लेखनीयोऽयमत्र यत् केवलं द्रुतिविस्तारविकासानां चित्तदशाः उद्दिष्टा भट्टनायकेन । किन्तु, इयं त्रयी अपूर्णा रससहचारिणीनां चैत्तिकदशानां विभावने एवं विक्षेपक्षोभदीप्तत्वानि कल्पन्ते समायोगायात्र । अस्मिन्प्रसङ्गे सचेतसामनुभवः प्रमाणभूतः । अभिनवगुप्तो यद्यपि निर्दिशति सम्भावनामन्यान्यमनोदशानामुदयस्यापि, तथापि इमाः षट्दशा भवन्ति व्यापिका, अतीव समावेशिन्यश्च ।

(ग)

अथ एकं तर्कसंगतं प्रश्नमुपस्थीयते—यदि रसानुभवकाले तावत्सङ्ख्यका मनोदशा आविर्भवन्ति, तर्हि कथङ्कारं रसानुभूतिर्माननीयाऽखण्डाऽविभाज्या च ? अपि च, कथं "प्रकाशानन्दमयी" स्वीकर्त्तव्यापि सा ?

धनिकेन निरूप्यते यत् सर्वे रसा जनयन्ति समसमानास्वादं, केवलं विभावादि भिन्नत्वात्, चित्तस्य विविधात्मिका अन्तर्दशाः समुपजायन्ते । ये कतिपये आचार्या मन्यन्ते रसस्य सुखदु;खात्मकप्रकृतिं तेषां सम्मुखे रसास्वादस्य प्रकाशानन्दमयत्वविषयकं प्रश्नं नोपस्थितम् । अनेनैव, आस्वादस्यैक्यस्य प्रश्नमपि नोपपन्नं तेभ्यस्तु । तथापि, प्रश्नमिदं वर्तते—किं कारणं रसः समीक्ष्यते परिनिष्ठिताचार्यपरम्परयाऽखण्ड आनन्दात्मको वा ?

मन्यामहे वयं यत्प्रधानकारणमस्मिन् विषये भवति दार्शनिकप्रवृत्तिराचार्याणाम् या तानुत्तेजयति स्म उपेक्षितुं यथार्थम् । इदं सर्वमान्यं तथ्यं यद् रसस्यानन्दात्मकताऽ-ख ण्डता च सिद्ध्यति मुख्यतया अभिनवगुप्तपादस्यावदानं यत् स्वीक्रियते स्माचिन्त-याऽतर्कयित्वा च पश्चाद्वर्तिविवेचकैरपि । परात्परतत्त्वं, ब्रह्म परमशिवो वा, भवति स्वप्रकाशं च आनन्दमयञ्च, अखण्डञ्च, अपरिवर्तनीयञ्च । ततो रसानुभवोऽपि भवेदानन्दात्मकोऽखण्डश्च यत् स वर्तते अन्तःकरणस्य विषयः, आत्मनो विषयो योऽस्ति परमात्मा एव, इति परिनिष्ठिता धारणा ।

परन्तु साङ्ख्ये निरूपितः त्रैगुण्यवादः स्वीक्रियते स्म सर्वैर्दर्शनैस्तु यतो हि स तिष्ठति मनःशास्त्रीयाधारे। तस्मात्, सर्वेषामुत्तेजनानां संसर्गे मनोविकारस्य वैविध्यस्योत्पत्तिर्न शक्यते प्रत्याख्यातुम्। यत आचार्याः प्रतिबद्धाः उपर्युक्तदार्शनिक-प्रतिपत्त्या तथा परिगृह्णन्ति स्म त्रैगुण्यवादमपि, ततो जटिलता सञ्जाता तेषां सम्मुखे कथङ्कारं समन्वयः स्थापितव्यो रसस्याखण्डत्वानन्दमयत्वयोः मनोविकारवैविध्ये च ? ते न शेकुः परित्यक्तुं विविधदशानामुदयं भावकस्य चित्ते रसकाले, तथा च नापि शेकुरुपेक्षितुं स्वदार्शनिकं विश्वासम्।

भट्टनायकेन स्वीक्रियते रसाभोगे रजस्तमसोऽनुवेधः सत्त्वोद्रेकेण सह यतो हि त्रयो गुणा विद्यन्ते परस्परसंयुक्ताः मानवचित्ते, तेषामेकस्यापि उद्रेकः संयुज्यते नूनमन्वयोरनुवेधेन। अनेनैव, रसः प्रख्यापितः तेन न विशुद्धानाविल ब्रह्मास्वादः प्रत्युत "ब्रह्मास्वाद सविधः". अथवा "ब्रह्मानन्दसहोदरः" यथोक्तं परवर्तिभिराचार्यैः। परन्तु इदमपि स्वीकर्त्तव्यमत्र यत् रजस्तमसोऽनुवेध आस्त पीडयन् तानन्तरतः यस्मादेव ते स्वीचक्रुः नानाविधमनोदशानामाविर्भावं रसानुभवकाले यथार्थबुद्ध्या। भट्टनायकस्य द्रुतिविस्तारविकासनिरूपणं प्रतिफलति स्म यतो हि पार्यन्तिकं पार्थक्यं स न शशाक विधातुं सत्त्वोद्रेकस्य रजस्तमसोभ्याम्। तर्हि, किं कर्त्तव्यं रसस्याखण्डत्वस्य, अविभाज्यत्वस्य वा ?

उत्तरत्वे तु विकल्पद्वयमुपस्थीयते—रसस्याखण्डता केवलमर्थवादो, न हि पारमार्थिकी; अथवा सा शृङ्खलिता रसानुभवस्य गह्वरस्य निरूपणेन। अयमैकान्तिक-गह्वरो विज्ञापितो रसानुभूतेः बहुशः प्रतिपादितया "वेद्यान्तरस्पर्शशून्यतया" या विद्योतयति प्रमातुरन्तश्चेतनाया निमग्नीभवनं संवेद्यभावानुभूतौ येनावान्तरवस्तुनः प्रतीतिर्बाष्पीभवेत्। इदं निमज्जनं मन्येत रसानुभवस्यैकं केन्द्रीयलक्ष्मं सर्वभावानां विषये। अपि च, इदमवबुध्येत रसस्यैकात्म्यस्य निदर्शकम्। अनया दृष्ट्या, रसानुभवो-ऽर्हति ग्रहीतुमखण्डत्वमविभाज्यत्वं वा यतो ह्यनुभवस्य गह्वरी विशेषयेत् सर्वरसान्। किन्तु, अयं नाचार्याणां प्रकृतदृष्टिकोणः।

आनन्दमयत्वविषये तु, परमात्मन आनन्दस्वरूपतैव सिद्ध्यति सनातनाधारः। नात्र कोऽप्यन्यतर्क उपस्थीयते गम्भीरत्वेनाचार्यैः। किन्तु, यदि चैतन्यस्यात्मपरामर्शमूल-कान्तर्मुखीभवनं स्यादानन्दस्य व्यावर्त्तकं लक्षणं यथा निरूपितमभिनवगुप्तेन, तर्हि रसास्वादः काव्यास्वादो वा शक्यते मन्तुमानन्दो यतो हि अत्रापि चित्तं भजते पूर्णनिमज्जनमात्मपरामर्शे। उक्तं धनञ्जयेन यत् काव्यार्थसम्भेदजन्यात्मानन्दो भवति काव्यस्य रसस्य वानन्दः—"स्वादः काव्यार्थसम्भेदात्मानन्दसमुद्भवः।" अर्थात्, आत्मानन्दः =आस्वादः तथा आस्वादः = आत्मानन्दः। अस्यैव कथनस्य सातत्ये तु स्वादस्य चत्वारः प्रकाराः कथ्यन्ते—"विकाशविस्तारक्षोभविक्षेपैः स च चतुर्विधः।" (दश०, ४/४३)।

उपरिगतविवेचनादयं निष्कर्षः प्राप्यते—रसास्वादस्य प्रकृतिर्भवति नानाविधा, किन्तु आस्वादस्य गहनता विभूषयति रसमखण्डतायाः संस्कृत्या संशीलेन वा यस्माद्रसो गण्यते अविभाज्यः, ऐकात्मको च, एवमात्मपरामर्शनिकषेन सोऽवबुध्येत आनन्द स्वरूपः तथापि, अस्मन्मते तु, प्रधानावलम्ब आचार्याणामस्मिन् विषये भवति परात्परतत्त्वस्य कूटत्वञ्च, ऐक्यञ्चानन्दस्वरूपत्वञ्च यथा निगद्यते शैवाचार्याभिनवगुप्तपादेन सुव्यक्तम्— "अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशङ्का ?" (हिन्दी **अभिनवभारती**, प्रथम संस्करण, आचार्य विश्वेश्वर पृ० ५०६)

घ

रसस्यास्वाद्यता चर्च्यतेऽस्माभिरुपरि। आस्वादनीयत्वं निरूपितमाचार्यैर्बलेन। भरतोऽपि रेखाङ्कयति तथ्यमिदं, यथा—"रस इति कः पदार्थः) ? अत्रोच्यते। आस्वाद्यत्वात्।" (**नाट्यशास्त्रम्**, षष्ठाध्यायः)। अत एव, युक्तमिदं यद् वयं परीक्षामहे विभिन्नरसानामास्वादनीयत्वम्। किञ्च, अपि सर्वेषां रसानामास्वादनमुपेतं समसमान-गह्वर्यां इत्यपि विचारणीयम्।

अस्मिन् सन्दर्भे दृष्टित्रयमुन्मीलितं नः सम्मुखे—प्रथमो, साक्षात्कारात्मकता; द्वितीया, चर्वणागोचरता, तृतीया च सामान्यानुभवनात्मकता। आचार्यैर्भावानां साक्षात्कारात्मिका प्रतीतिर्निरूप्यते रसविषये। "पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्", इति प्राह मम्मटः। अनेन रसस्य साक्षात्कारात्मिका प्रतीतिः व्यज्यते। चर्वणातत्त्वं गृह्णाति सातिशयं महत्त्वमभिनवगुप्तस्य प्रतिपादने, इति जानन्ति सर्वे विद्वांसोऽभिनवभारत्यनुशीलनेन। अत्र स प्रणुदितो भूरिशो भट्टनायकस्य "भोगेन भुज्यते।" "चर्व्यमाणतैकसारः", इति रसो विशेष्यतेऽभिनवेन। मम्मटोऽपि प्रयोजयति "चर्व्यमाणतैकप्राणः" इति रसास्वादं ज्ञापयितुम्। इयं चर्वणागोचरता लक्षयति प्रमातु-र्वेद्यान्तरसम्पर्कशून्यास्वादनं प्रस्तुतस्थायिनो यदा स भवेदात्मविभोरः। सामान्यानु-भवनात्मकताया विन्दुः स्वतः स्पष्टः। अयं न प्राप्नोति चर्व्यमाणतां साक्षात्का-रात्मकताञ्च।

इदानीं प्रसिद्धरसानां रस्यमानताऽर्हति परीक्षितुमनेन हेमलेन त्रिधात्मकेन।

मन्यामहे वयं यत् द्वौ रसौ, शृङ्गारश्च करुणश्च, पूर्णतः प्रत्युत्तरशीलौ पूर्णतः वर्तमाननिकषं प्रति। प्रमातुरन्तःकरणस्य द्रवीभवनं पूर्णतः सम्पद्यते, बिभर्ति सम्पादनीयतां वा अनयोर्रसयोरनुभवे। तयोः प्रतीतिर्भवति साक्षात्कारात्मिका, चर्वणागोचरा च, समुल्लङ्घ्य सामान्यानुभवनात्मकताम्। अत्रैकं कारणमस्ति यदिमौ संबद्धौ अस्माकं जिजीविषया—शृङ्गारो विधेयात्मकरीत्या करुणो निषेधात्मकरीत्या

च। अस्मन्मते, शान्तोऽपि भवति ग्राह्यः प्रस्तुतनिकषेन। एतस्य स्थायी, शमः तृष्णाक्षयसुखो वा, जागरति आनन्दस्यानुभूतिं सचेतसो हृदये। विश्वनाथेन कथ्यते यच्छान्ते वर्तते स्थितिरधिकतरा माधुर्यगुणस्य अन्येषां रसानामपेक्षया। माधुर्यं बोधयति द्रुतिमन्तःकरणस्य। सुतरां, साक्षात्कारात्मकता चर्वणागोचरतयोः तत्त्वे प्रविशतो निसर्गतः शान्तस्यानुभवे, इति मन्यतेऽस्माभिः। इत्थं शान्तो दधाति तृतीयं स्थानमास्वाद्यमानत्वविषये। साक्षात्कारात्मकत्वमपि गृहीतव्यमत्र।

यदि कोऽपि अन्यो रसो बिभर्ति योग्यतां कषितुमुपरिप्रस्तावितनिकषे, तर्हि केवलं भयानकः समायाति सम्मुखम्। वयं जानीम यत् भयानक एव प्रपञ्च्यते अभिनवगुप्तेना**भिनवभारत्यां** स्वीये रसनिरूपणे, समुद्धृत्य "ग्रीवाभङ्गाभिरामम्" इत्यादि शाकुन्तलात्। अत्र विवक्षामो वयं यदन्यो उदाहरणं युक्ततरं ग्रहीतुमशक्नोदभिनवगुप्तोऽस्मिन् प्रसङ्गे भयानकरसस्य निरूपणे, तस्यानुभवस्य साक्षात्कारात्मकतादिनिदर्शनाय। किन्तु, क्षमन्तां मां विद्वांसो यदि वयं वदामो यद् भयानको नोपलब्धः स्वीये पूर्णायामे संस्कृतकाव्येषु यथा दृश्यते पाश्चात्यानां त्रासदीषु (ट्रैजिडीषु)। तथाप्यभिनवस्य प्रतिपादने, भयानकस्य प्रतीतिः सिद्ध्यति साक्षात्कारात्मिका च, चर्वणीया च।

उपर्युक्तं रसचतुष्टयं व्यतिरिक्तम्, अन्येषु रसेषु तावान् परिमाणः साक्षात्कारात्मकत्वस्य, चर्वणागोचरतायाश्च, नोपलभ्यते यावानेतेषु चतुर्षु रसेषु। अन्ये रसा न प्रभवन्त्यतिक्रमितुं सामान्यानुभवनात्मकतापरिधिम्। वीररसे तु एते द्वे तत्त्वे लभ्यमाने, किन्तु न हि प्रस्फुटत्वेन, इति मतमस्माकम्—पण्डितानां मतं वर्जयित्वा। अद्भुते चर्वणीयता वर्तमाना, किन्तु न साक्षात्कारात्मकता। वात्सल्यं सिद्ध्यति चर्वणागोचरमेकस्मै विशेषाय सहृदयवर्गाय, किन्तु अस्मन्मते तु, इदं चर्वणागोचरत्वं न सिद्ध्यति वेद्यान्तरसम्पर्कशून्यत्वम्। भक्तिरसास्वादोऽपेक्षते सामान्यविशिष्टं प्रमातृसमुदायम्। "कृष्णभक्तिरसो जरन्मीमांसकाद् रक्ष्यः", इति कथनेन सूच्यते रूपगोस्वामिमहोदयैः[१] स्वयमेव भक्तिरसस्य परिमिताकर्षणम्। अत्र दुर्बलतमः पक्षो बीभत्सस्यास्मन्मते। वर्तमाना परीक्षा भवति समुपकारका युक्तिसम्मतनिष्कर्षणे।

(ङ)

विचारणीयमिदानीं सुस्थभावेन—अन्तरे वर्तमाने विभिन्नरसानां साक्षात्कारात्मकत्वचर्वणागोचरत्वविषये अथ च नानाविधत्वे प्राप्तव्ये रसकालोपलभ्यासु

---

१. इत्येष भक्तिरसिकैश्चोरादिव महानिधिः।
जरन्मीमांसकाद् रक्ष्यः कृष्णभक्तिरसः सदा।
हरिभक्तिरसामृतसिन्धु, दक्षिण विभाग, स्थायीभाव लहरी, १११-१३)

चैत्तिकदशासु, कथङ्कारं समीचीनं भवति समीक्षितुं रसानुभवम् अखण्डम् आनन्दमयञ्च ? प्रतीतिसाम्यक्यस्य च रस्यमानत्वे परिमाणस्य च भिन्नतया रसो न मानितव्योऽखण्डः। अर्थात्, रसस्य श्रेण्यो माननीयाः, यथा, पक्वो रसः'' (पूर्णतयास्वाद्यः पूर्णतया साक्षात्कृतश्च), 'अपक्वो रसः'' (ईषदास्वाद्य ईषत्साक्षात्कृतश्च) इत्यादि। तथैव, रसकालजन्यचैत्तिकदशानुसारेण, रसानां प्रकृतिर्व्रजेत्, परिवर्तनं भिन्नत्वं वा। अर्थात्, संवादो विद्येत तत्तच्चैत्तिकदशोत्पादकभावस्य च, संबद्धरसस्य च। वर्तमाने प्रश्नपरायणे युगे, आचार्याणां दार्शनिका भूमिर्न माननीया। रामचन्द्रगुणचन्द्रादयो जैनाचार्या न मन्यन्ते रसं केवलं सुखात्मकम्। काव्यस्य ''सुखदुःखात्मकता'', इति ''नव्यानां'' मतमिति भणति सिद्धिचन्द्रः।[1] परं, विवक्षामो यत् रसस्यानुभवो विविधात्मको, न सुखात्मको, नापि उभयात्मकः। यथार्थस्यानुरोधः नोपेक्षणीयः, सहृदयस्य दृष्ट्यैव। विश्वनाथस्य ''काव्यसंश्रयो'' न प्रभविष्यति परिवर्तयितुं कस्यापि भावस्य लोकसंसिद्धां प्रकृतिम्।

सुतरां, रसस्याखण्डता, रसस्यानन्दमयता वा नातिरिच्यतेऽर्थवादात्।

---

१. **Dr. S. K. De.** *History of Sanskrit Poetics*, **Part II p. 260, fin.**

गौणी तु न पृथग्वृत्तिः

डॉ० ठाकुरदत्तो जोशी

जोधपुरम्

विदितचरमेव अलङ्कारशास्त्रविकासविदां विदुषां यत्प्रयोजनवतीलक्षणा गौणीशुद्धाभेदमाध्यमेन द्विधा विभज्यते । आचार्याणां मतानुसारेण उपचारस्तत्र कारणम् । तद्यथा—गौण्यामुपचारः उत वा साधर्म्यं सम्प्राप्यते, किन्तु शुद्धायां तस्य अभाव एव परिलक्ष्यते ।

प्राचीनमीमांसकास्तदनुयायिनश्च गौणीं लक्षणातश्च भिन्नां वृत्तिं स्वीकुर्वन्तीति तथ्यमेतदर्वाचीना विद्वांसोऽपि सम्यग्विदांकुर्वन्त्येव[1] ।

प्रायः काव्यशास्त्रस्याचार्या गुणवृत्तिं लक्षणान्तर्भूतामभिन्नामेव वा मन्वाना एकयैव परिभाषया परिभाषयन्ति ।

लक्षणा गौणीवृत्तिश्च

इदानीं विवादग्रस्ताया लक्षणाया गुणवृत्तेश्चेतिवृत्तं विविच्यते । आलङ्कारिकाः सादृश्यमूलकलक्षणां गौणीनाम्ना समुच्चरन्ति, किन्तु मीमांसका गौणी तु भिन्नवृत्तिरिति रागमालापयन्ति । विषयेऽस्मिन् तेषां मान्यता प्रसरति यद्गौण्यां शब्दप्रयोगः सम्प्राप्यते

---

१. गौणी स्वतन्त्रवृत्तिः अभिधातो लक्षणातश्च विलक्षणा इति वेदवादिनां मीमांसकानां सिद्धान्तः । स एव च मधुसूदनसरस्वतीपादेनाङ्गीकृतः । नरेन्द्रनाथः चौधुरी, **काव्यतत्त्वसमीक्षा**, मोतीलाल बनारसीदासः, दिल्ली, १९५९ ई० पृ० ३१८

तथैव—मीमांसकास्तु गौणीमपि लक्षणातो भिन्नां स्वीकुर्वते अपरे नैयायिकादयस्तु लक्षणातोऽभिन्नां लक्षणाप्रभेदरूपां वा मन्यन्ते । **शब्दबोधविमर्शः**, बदरीनाथसिंहः, गोदोलिया, वाराणसी, सं० २०२८ पृ० २६५

लक्षणायान्तु न। 'गौणे शब्दप्रयोगः न लक्षणायाम्' आद्यस्योदाहरणं 'गौर्वाहीकः''सिंहो माणवक.' द्वितीयस्योदाहरणन्तु 'गङ्गायां घोषः' इति प्रसिद्धमेव।

शब्दप्रयोगे गौणेति मीमांसकमान्यता आलङ्कारिकैर्नैवाङ्गीक्रियते, यतो हि तन्मते हेतुकोटयां समापतितः शब्दप्रयोगो गौण्या लक्षणयाश्च भेदको नैव भवितुमर्हति। यतो हि आलङ्कारिकैः प्रकारान्तरेण शब्दप्रयोगे सारोपा तदभावे साध्यवसाना भेदद्वयमस्मिन्नेव प्रकरणे स्वीकृतमासीत्।[1]

मीमांसका यां गौणीति आचचक्षिरे नैयायिकैः आलङ्कारिकैस्तत्रापि लक्षणा समाम्नाता[2] मीमांसकेष्वपि प्राभाकरा गौणीं पृथग्वृत्तिरूपेणामनन्ति। भाट्टमीमांसका लक्षणायामेव गौणीमन्तर्भूयोपचारस्य मिश्रणादमिश्रणाच्च लक्षणां गौणीशुद्धा भेदाभ्यां विभजयाञ्चक्रुः।

गौण्या विकास

यास्क (७०० ई० पू०) समयादेव लक्षणाविषयकतत्त्वानां चर्चा समारब्धासीत्, तथापि स्पष्टरूपेण तस्या पारिभाषाविषयकी तथा स्वरूपविषयिकी च चर्चा कुमारिल-भट्टात्पूर्वं नैव सम्प्राप्यते। **भर्तृहरिणा** [५७५-६५१] गुणवृत्तिविषये अथवा लक्षणाविषये गौणशब्दो व्यवहृतः[3]। **कुमारिलभट्टः** [६५०-७५० ई०] प्रथमाचार्य आसीत् येन

---

१. विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत्।
सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका॥

विश्वनाथः, सहित्यदर्पणम्, भारतीयविद्याप्रकाशनम्, दिल्ली, १९७८ ई० पृ० ९७

तथैव—गौणी तु न पृथग्वृत्तिरिति ज्ञापयितुं सारोपा साध्यवसाने विभज्यते। **काव्यप्रकाशः** सटीकः (पं० गोकुलनाथोपाध्यायः) संस्कृतविश्वविद्यालयः, वाराणसी, १९६१ ई० पृ० ७०

२. नैयायिका आलङ्कारिकाश्च इमां गौणीवृत्तिं लक्षणाया भेदकत्वे नाङ्गीकुर्वन्ति। **काव्यतत्त्वसमीक्षा**, पृ० ३१८

३. सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः।
प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वञ्चोपजायते॥

भर्तृहरिः **वाक्यपदीयम्**, मोतीलाल बनारसीदासः, दिल्ली, १९७१ ई० पृ० ९५

गौणीवृत्तिलक्षणातो भिन्ना स्वीकृता, लक्षणञ्चोभयोः पृथग् पृथग्रूपेण कृतम्। स अभिधेयेन संयुक्तार्थस्य प्रतीतिं लक्षणा इति मनुते। स्वीकरोति च लक्षमाणगुणानां योगापेक्षयैव गौणीवृत्तिः प्रसरति[1]। गौणशब्दं परिभाषयन् भट्टो बभाषे यन्मुखवत्प्रथमतः प्रतीतिगम्यत्वात शब्दार्थः किं वा वाच्यार्थो मुख्यतत्त्वरूपेण समाख्यायते, वाच्यार्थजन्यगुणानां कारणादेवान्यार्थस्य गौणता मन्यते[2]। अनुमीयते यल्लक्षणाया द्वौ मुख्यौ भेदौ गौणी—शुद्धेति अष्टमशताब्द्यात्पूर्वं नैवास्ताम्। कालेऽस्मिन् गौणी, शुद्धा इति द्वे स्वतन्त्रे वृत्ती प्रचलिते आस्ताम्। तन्त्रवार्तिककार-कथनं मतमेनं समर्थयति।

उद्भटेन (८ वीं श०) ध्वनिविमर्शप्रकरणे लक्षणाशब्दस्य प्रयोगो विहितः[3]। रूपकालङ्कारवर्णनप्रसङ्गे लघुवृत्त्यां गुणवृत्तिशब्दस्य प्रयोगः सम्प्राप्यते[4]। **वामनस्य**

---

१. **अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते।**
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टातु गौणता॥

कुमारिलभट्टः, **तन्त्रवार्तिकम्**, चौ० सं० बुकडिपो, वाराणसी, १९०३ ई० पृ० ३१८

२. **शब्दार्थस्येव मुख्यत्वं मुखवत्प्रथमोद्गतेः।**
अर्थगम्यस्य गौणत्वं गुणागमनहेतुकम्॥

परगुणानां परत्राभावादशक्यं गुणेभ्य आयात इत्येवं लक्षणं गौणत्वम्। पराधीनवृत्तिश्च गौणो नित्यं (नित्यं गौणं) प्रतीयते। **तन्त्रवार्तिकम्**, पृ० ७६३-७६४

३. तत्सदृशस्य या लक्षणा तस्या अत्यन्ततिरस्कृतवाच्यमूलत्वात्। उद्भटः, **काव्यालङ्कारसारसंग्रह एवं लघुवृत्तिः**, भण्डा० ओ० रि० पूना, १९२५ ई० पृ० ४२८

४. गुणवृत्तिः प्रधानेन युज्यते रूपकं तु तत्। तत्रैव, पृ० ४२८
तथैव—शब्दानामभिधानमभिधाव्यापारो गुणवृत्तिश्च।
अभिनवगुप्तः, **ध्वन्यालोकलोचनम्**, चौ० वि० वाराणसी, १९६५ ई० पृ० ६३

(८ वीं० श०) काव्यालङ्कारस्य द्वितीयाध्याये कविसन्दर्भप्रकरणे गौणशब्दस्य[1] तथैव वक्रोक्त्यलङ्कारस्य वर्णनावसरे च लक्षणा शब्दस्य प्रयोगो दृष्टिपथमायाति[2]।

आनन्दवर्धनः (८५०-८७५ ख्री०) गौण्याः कृते गुणवृत्तेस्तथा लक्षणाशब्दस्यापि प्रयोगं कृतवान्। मनुते च लक्षणामेव मुख्यव्यापारम्। भाक्तमतानां निरसने लक्षणा गौणी च उभे तेन वर्णिते[3]। **खण्डदेवस्य** (१७वीं० श०) मते तु स्वशक्यनिष्ठगुणवत्ता एव गौणी वृत्तिः[4] एवमेतावत्कालपर्यन्तं गुणवृत्तेर्लक्षणाशब्दस्य च प्रयोगो विहितो वर्तते। अन्येन केनापि आचार्येण गुणवृत्तेरन्तराले लक्षणामपि अन्तर्भावयता गौणशब्दस्य उत वा गुणवृत्तिशब्दस्य प्रयोगो विहितः। वस्तुतः कुमारिलभट्टसमये या गौणवृत्तिः, लक्षणातो भिन्ना स्वतन्त्ररूपेण च सम्प्रतिष्ठिता आसीत्, सैव मुकुलभट्टस्याभिधा-वृत्तिमातृकायां लक्षणायां भेदद्वयान्तर्गतद्वितीयभेदरूपेण अर्थादुपचारस्य भेदद्वयान्तर्गत-द्वितीयभेदरूपेण गौणनामतया ख्यातिमाजगाम। भट्टस्यानुसारेणोपचारः शुद्धगौण-रूपेण द्विविधः। तेऽपि आरोपाध्यवसानाभ्यां द्विधा विभागमाप्नुतः। एवमुपचार-श्चतुर्विधः।[5] इत्थमुपचारमाध्यमेन विभाजिता गौणी मम्मटेन काव्यप्रकाशे प्रयोजन-वतीलक्षणावर्णनावसरे लक्षणाङ्गरूपेण तद्भेदरूपेणोपन्यस्ता तथा सर्वदा कृते मीमांस-काभिमतायाः स्वतन्त्रताया गौण्या वृत्तेः समावेशो लक्षणायामेव विहितः।

---

१. अरोचितृष्णाव्यवहारशब्दौ गौणार्थौ।

वामनः, काव्यालङ्कारसूत्रवृत्तिः, हिन्दी-अनुसन्धानपरिषद्, दिल्ली विश्व-विद्यालयः, दिल्ली, १९५४ ई० पृ० १३

२. सादृश्यलक्षणा वक्रोक्तिः। तत्रैव, पृ० २६५

३. गुणवृत्तिस्तूपचारेण, लक्षणया चोभयाश्रया भवति तदेवं सति लक्षणैव मुख्यो व्यापार। ध्वन्यालोकः पृ० २८३

४. स्वशक्यनिष्ठगुणवत्ता गौणीवृत्तिलक्षणम्।

खण्डदेवः मीमांसाकौस्तुभः, चौ० सं० सी० आ० वाराणसी, १९२३ ई० पृ० २८३

५. आरोपाध्यवसानाभ्यां शुद्धगौणोपचारयोः।

प्रत्येकं भिद्यमानत्वादुपचारश्चतुर्विधः॥

मुकुलभट्टः, अभिधावृत्तिमातृका, चौ० सं० आ० वाराणसी, १९७३ ई० पृ० १५

मम्मटप्रभृत्यालङ्कारिकाणां समर्थनं धर्मराजाध्वरीन्द्रः, कणादतर्कवागीश, अन्नंभट्टप्रभृतयो नैयायिका अप्यकार्षुः। इमे दार्शनिका गौणीं भिन्नवृत्तिरूपेण नैवामनन्ति। वस्तुतः पूर्वनिगदिता विरोधिधारणाऽष्टमशताब्दिपर्यन्तं मीमांसकेषु बद्धमूलासीत्। अग्रेऽपि मीमांसकानुयायिनः शालिकनाथभोजराजरुय्यकगागाभट्टप्रभृतयो विद्वांसो मूर्धन्यस्थानं बिभ्रति। गागाभट्टो (१७ वीं० श०) गौण्याः पृथगस्तित्वं समर्थयन् प्राह – गौणी भिन्नवृत्तिरूपेणास्वीकुर्वाणे तु 'यजमानः प्रस्तरः' वैदिकवाक्येऽस्मिल्लँक्षणा न भविष्यति। स्वीकुर्वाणे तु लक्षणा भविष्यति। यतोऽत्र यजमानप्रस्तरयोर्यागकारणतारूपगुणयोगाद् यजमानपदं प्रस्तरे गौणमस्ति, अतः गौणीवृत्तिर्लक्षणातो व्यतिरिक्ता एव[1]।

गौण्या पृथक्तायाः समर्थका आचार्याः

शालिकनाथः (१० वीं० श०) प्रकरणपञ्चिकायां लक्षणाया गौण्याश्च पृथगस्तित्वं प्रतिपादयामास[2]। भोजराजोऽपि सरस्वतीकण्ठाभरणेऽभिधाया भेदान् विवेचयन् गौणी लक्षणातो भिन्ना इत्येव समर्थयामास। शृङ्गारप्रकाशेऽपि मीमांसकमान्यतां नैव विजहाति[3] यतो हि तेन तत्र वृत्तयो मुख्या, लक्षणा, गौणीतिभेदेन त्रिधा विभाजिता।

---

१. एवंविधगौणत्वाङ्गीकारे च शक्यार्थत्यागाभावेन न वेदाप्रामाण्यापत्तिलेशोऽपि अतएव 'यजमानः प्रस्तर' इत्यादौ यजमानप्रस्तरयोर्यागकारणत्वरूपगुणयोगेन यजमानपदं प्रस्तरे गौणमतो भिन्ना लक्षणातो गौणी। गागाभट्टः, **भाट्टचिन्तामणिः** चौ० सं० सी० आ० वाराणसी, १९ ३ ई० पृ० ५९

२. प्रयोगश्च श्रुत्या लक्षणया गौण्या वा वृत्त्या नानुपपन्नः। शालिकनाथः, **प्रकरणपञ्चिका**, चौ० सं० बु० डिपो० वाराणसी, १९०३ ई० पृ० २८। तथैव-यो वेदे तथाभूतार्थाप्रयोगः स गौणेन लाक्षणिकेन वा वर्णनीयः। तत्रैव, पृ० १५०

३. अभिधेये प्रवर्तमानः शब्दो वृत्तित्रयेण वर्तते। ताश्च मुख्याः, गौणी, लक्षणेति तिस्रः।

भोजः, **शृङ्गारप्रकाशः**, प्राचीन संस्कृतग्रन्थप्रकटनविश्वसंस्थाध्यक्षः, मैसूरनगरी, १९५६ ई० पृ० २२३

तथैव-शब्दस्य प्रतिपादनशक्तिरभिधा, सा च त्रिधा मुख्या, गौणी, लक्षणा च।

भोजः, **सरस्वतीकण्ठाभरणम्**, निर्णयसागरमुद्रणालयः, मुंबई, । १९३४ ई० पृ० १८८

भोजस्य (१० वी० श०) सिद्धान्तानुसारेण प्रतीयमानशौर्यादिगुणैर्व्यवहितार्था गौणीवृत्तिर्भवति । स शृंगारप्रकाशे गौण्या लक्षणं लक्षणातो भिन्नरूपेणैव कृतवान्[1] । **हेमचन्द्राचार्यः** (१०८८-११७२ खी०) गौणीं भिन्नवृत्तिरूपेणाङ्गीचकार ।[2]

रुय्यकस्य शिष्यो **मंखकः** (११२८-११५० खी०) भोजमनुसरन् विलोक्यते । मंखकानुसारेण पदार्थप्रतिपादने जन्या व्यापाराः वृत्तिपदेनाभिधीयन्ते । सा वृत्तिर्मुख्या, लक्षणा गौणीतिरूपेण त्रैविध्यं बिभर्ति ।[3]

कुमारिलभट्टस्यानुगमनं कुर्वता मंखकेन गौणी लक्षणा च उभे एव अनेक-शब्दावलिमाध्यमेन विवेचिते ।[4] **गागाभट्टो** (१६०५ खी०) लक्षणां गौणीञ्चापर-पदवृत्तिरूपेणाङ्गीकुर्वल्लँक्षणातो गौणीं भिन्नामेव मेने ।[5]

भट्टशङ्करो (१६३५ खी०) लक्षणायां गौण्याञ्च दौर्बल्यबीजमेव कारणं मन्वानो द्वयोरेव पार्थक्यं तनुते । उभयत्रापि तयोर्द्वयोर्दौर्बल्यबीजं तेन अभिन्नरूपेण न

---

१. गम्यमानशौर्यादिगुणव्यवहितार्था गौणी । शृंगारप्रकाशः, पृ० २२३

२. तत्र संकेताभावान्नाभिधा, नापि गौणी लक्षणा वा, मुख्यार्थबाधादिलक्षणा-भावात् । हेमचन्द्रः, **काव्यानुशासनम्**, निर्णयसागरमुद्रणालयः, मुंबई, १९०१ ई० पृ० २५४

३. **वृत्तिः पदानां व्यापारः पदार्थप्रतिपादने ।**
सा मुख्या लक्षणा गौणीत्येवं त्रैविध्यमास्थिता ।।

मंखकः, **साहित्यमीमांसा**, चित्रावतारमहाराजशासनान्तर्गतरा-जकीयमुद्रणालयाध्यक्षः त्रिवेन्द्रम्, १९३४ ई० पृ० २

४. **स्पृशत्यर्थान्तरं गौणी लक्ष्यमाणगुणान्वयात् ।**
अभिधेयाविनाभूतं स्पृशन्ती लक्षणोच्यते ।।

तत्रैव पृ० २

५. लक्षणा गौणी च अपरपदवृत्तिः ।

गागाभट्टः, **भाट्टचिन्तामणिः**, चौ० सं० सी० आ० वाराणसी, १९३३ ई० पृ० ५७

विवेचितम् ।[1] श्रीधरस्वामिनापि (१६५०-१७०८ ख्री०) गौणीवृत्तिलक्षणातो भिन्ना स्वीकृता ।[2]

इत्थमष्टमशताब्दिपर्यन्तं भिन्नवृत्तिरूपेण प्रतिष्ठिताया गौण्या मम्मटादिभिर्लक्षणायामन्तर्भावे कृतेऽपि मीमांसकैस्तदनुयायिभिश्चान्यैरालङ्कारिकैश्च चिरकालपर्यन्तं कुमारिलभट्टस्यानुकरणं विहितम् । बहुभिरन्यैरालङ्कारिकैर्दार्शनिकैश्च मम्मटस्यानुकरणं विधाय गौण्याः समावेशो लक्षणायामेवङ्गीकृतः । मम्मटसमर्थकानामपि कालक्रमेण विवेचनमत्यावश्यकमिति मत्वा तान्सर्वानिह प्रस्तौमि ।

गौण्याः पृथगस्तित्वस्य विरोधिन आचार्याः—

गौणी तु न भिन्नवृत्तिरिति विचारधारायाः पृष्ठपोपकेष्वाचार्येषु अजितसेनः (१२६६ ई०) प्रामुख्यं भजते । तेन अलङ्कारचिन्तामणौ कथितं यल्लक्षणाविशेष एव गौणीवृत्तिः, यतो हि द्वयोस्सम्बन्धानामाधार एक एव ।[3] चण्डीदासः (१३०० ई० ख्री०) काव्यप्रकाशस्य टीकायां लक्षणातः गौणीवृत्तिं पृथग्रूपेण स्वीकुर्वतां विदुषां मतं रिक्ततरं मनुते ।[4] दर्पणकारो **विश्वनाथः** (१३००-१३८० ख्री०) गौण्या अष्टभेदान् प्रकुर्वाणोऽपि गौणीं लक्षणातो भिन्नां न मेने ।[5]

---

१. दौर्बल्यबीजन्तु लक्षणायां शक्यसम्बन्धमात्रापेक्षणात् । गौण्यां शक्यसम्बन्धिगुणसम्बन्धगुणसम्बन्धापेक्षणात् ।
शंकरभट्टः **मीमांसाबालप्रकाशः**, चौ० सं० सी० आ० वाराणसी, १९०२ ई० पृ० १४१ .

२. श्रीधरस्वामिना गौणीवृत्तिः भिन्नेवेत्युक्तम् ।
आशाधरः भट्टः, **त्रिवेणिका**, भारतीय साहित्यविद्यालयः, वाराणसी, १९५७ ई० ३२ पृष्ठे समुद्धृतम् ।

३. लक्षणाविशेष एव गौणीवृत्तिः । तयोः सम्बन्धमूलत्वाविशेषात् ।
अजितसेनः, **अलङ्कारचिन्तामणिः** भारतीयज्ञानपीठम्, काशी, १९७३ ई० पृ. २६६

४. लक्षणातो भिन्ना गौणीति ये मन्यन्ते तन्मतं रिक्ततरमिति सूचनपरम् ।
काव्यप्रकाशः सटीकः (टी० **चण्डीदासः**' जयकृष्णदासः विद्याविलासमुद्रणालयः वाराणसी, १९३३ ई० पृ० ५१

५. **सादृश्येतरसम्बन्धा शुद्धास्ता सकला अपि ।**
सादृश्यात्तु मता गौण्यस्तेन षोडशभेदिता ॥
विश्वनाथः, **साहित्यदर्पणम्**, भारतीयविद्याप्रकाशनम्, दिल्ली, १९७८ ई० पृ० ९९

विद्यानाथो (१४ वीं० श०) गौणीं लक्षणाभेदरूपेणाङ्गीकृतवान् यतो हि उभयत्रापि सम्बन्धानुपपत्तिः मुख्यार्थबाधः वा कारणम् ।[1]

साहित्यरत्नाकरकारो धर्मसूरिरपि गौण्याः पृथगस्तित्वं निराकुर्वन् मीमांसकान् प्रति ब्रूते 'अग्निर्माणवकः' इत्यत्र अग्निगतपैङ्गल्यादिगुणानां सादृश्यान्माणवकमग्निशब्देन समुच्चरन्तो येऽत्र गौणीवृत्तिं स्वीकुर्वन्तो गौण्याः स्थानं लक्षणातो भिन्नं मन्यन्ते तान्पृच्छामः, सम्बन्धानुपपत्तयो मुख्यार्थबाधादयो वा लक्षणायां कारणानि सन्ति, तानि सर्वाणि इहापि सन्ति न वा ? यदि सन्ति लक्षणाव्यवहारेण किमपराद्धम् ? यद्यत्र लक्षणाप्रयोजकसम्बन्धानामभावः स्वीक्रियते चेत्तदपि न समीचीनम्, कथं चेत्तेषां दुरपह्नवत्वात् । अन्यच्च अग्निमाणवकयोः कियानपि दुर्निरीप्यः किं न भवेत् किन्तु सः सादृश्यकोटचामेव समापतति ।

अतोऽत्र लक्षणा स्वीकरणमेव वरम्[2] ।

जगदीशतर्कालङ्कारो (१६५३ खी०) गौणीवृत्तिं लक्षणायामेवान्तर्भावयन् ब्रवीति 'अग्निर्माणवक' इत्यादिस्थलेषु लक्षणया अग्न्यादिसादृश्यमर्थाद् अग्निसदृशतेजस्वितायुक्तस्य माणवकस्य प्रतीतिर्जायते ।[3] तर्कालङ्कारेण लक्षणाभेदवर्णनावसरे

---

१ गौणीवृत्तिरपि लक्षणा प्रभेद एव, सम्बन्धानुपपत्तिमूलत्वात् । विद्यानाथः, प्रतापरुद्रीयम्, राजकीयग्रन्थमालाधिकारी मुंबई, १९०९ ई० पृ० ४५

२. आचार्याः पुनरग्निर्माणवकः इत्यत्र अग्निपैङ्गल्यादिगुणसादृश्यान्माणवकेऽग्निशब्दप्रवृत्तिरिति गौणी नाम वृत्त्यन्तरमुररीचक्रिरे । तथा चोक्तम्—

अग्निस्वलक्षितादर्थाद् यत्पैङ्गल्यादि गम्यते ।
तेन माणवकेबुद्धिः सादृश्यादुपजायते ।। इति ।।

तान्पृच्छामः सम्बन्धानुपपत्तिप्रयोजनानि खलु लक्षणाबीजानि । तानीहापि सन्ति किम् ? न सन्ति वा ? आद्ये किमपराद्धं तत्र लक्षणाव्यवहारेण । न द्वितीयः, तेषां दुरपह्नवत्वात् । नन्वत्र सम्बन्धो दुर्निरूपः । कस्तवायमभिप्रायः ? अभिधेयाविनाभावो न सम्भवतीति चेत्, मा सम्भवतु, सादृश्यं तु भविष्यति । नहि स एव सम्बन्धो लक्षणोपयोगीति निर्बन्धः ।

धर्मसूरिः, **साहित्यरत्नाकरः**, उस्मानिया विश्वविद्यालयः, हैदराबाद, १९७२ ई० पृ० २७ ।

३. गौणीवृत्तिरपि लक्षणैव, यथाऽग्निर्माणवकः गौर्वाहीकः अत्र लक्षणया अग्न्यादिसादृश्यं प्रतीयते ।

जगदीशतर्कालङ्कारः, **तर्कामृतम्**, चौ० विद्या० वाराणसी, १९७३ ई० पृ० ५१

लक्षणया सह गौण्या चर्चा नैव विहिता।[1] अतोऽनुमीयते स मीमांसकविचारधाराया विरोधमेव नैव करोति अपितु तद्विचारधारामुपेक्ष्यते च।

धर्मराजाध्वरीन्द्रः (१५६०खी०) तदनुयायिनो वेदान्तिनश्च गौणीं पृथग्वृत्तिरूपेण नैवाङ्गीचक्रिरे। एते लक्षितलक्षणायामेव गौणीमन्तर्भावयन्ति। तेषां मान्यतास्ति 'यत्सिंहो माणवकः' इत्यादिस्थले सिंहशब्दवाच्यस्य सम्बन्धिनो ये शौर्यक्रौर्यादयो धर्मास्तादृशक्रौर्यादिसम्बन्धान्माणवकस्य प्रतीतिर्लक्षणया वृत्त्यैव भवति, अत उक्तस्थले गौणीवृत्तिस्वीकरणमसमीचीनम्।[2] **कणादतर्कवागीशेन** (१५६०खी०) गौणीलक्षणयोरभेदः स्वीकृतः। भाषारत्ने स प्रोक्तवान् यन्नैयायिकप्रभृतय आचार्या गुणयोगादेषा गौणी लक्षणा भवति इत्युक्त्वा वृत्त्यन्तरमस्या अपाकुर्वते, वस्तुतो गौणीलक्षणाया आधार सादृश्यात्मकसम्बन्ध एव भवति।[3]

---

१. **जहत्स्वार्थाजहत्स्वार्थाऽऽधुनिकादयः।**
लक्षणाविविधास्ताभिर्लक्षकं स्यादनेकधा॥

जगदीशतर्कालङ्कारः, **शब्दशक्तिप्रकाशिका,** चौ० सं० सी० आ० वाराणसी, १९६३ ई० पृ० १५४

२. गौण्यपि लक्षितलक्षणैव। यथा सिंहो माणवकः इत्यत्र सिंहशब्दवाच्यसम्बन्धिक्रौर्यादिसम्बन्धेन माणवकस्य प्रतीतिः।

धर्मराजाध्वरीन्द्रः, **वेदान्तपरिभाषा,** चौखम्बा संस्कृतपुस्तकालयः, वाराणसी, १९३७ ई० पृ० १२१

३. नैयायिकादयस्तु गुणयोगादेषा गौणी लक्षणेति व्याचक्षाणा वृत्त्यन्तरत्वमस्या प्रतिक्षिपन्ति तत्र सादृश्यात्मकसम्बन्धो लक्षणागौणी। कणादतर्कवागीशः, **भाषारत्नम्,** कलकत्ता-संस्कृतसाहित्यपरिषद् भवनम्, कलकत्ता, १९३६ ई० पृ० २१६

तथैव—लक्षमाणा जाड्यादयः तैरेव यदि योगः शक्यसम्बन्धस्तदा गौणीवृत्तिरिति।

काव्यप्रकाशः सटीक (टी० भीमसेनः) चौ० सं० सी० आ० वाराणसी, सं० १९१४, पृ० ७१

अप्पयदीक्षितः (१६ वीं० श०) मीमांसकमतं खण्डयन्नाह—सादृश्यस्यापि सम्बन्धसत्वात् गौण्यास्समावेशो लक्षणायां भवितुमर्हति । अतः सादृश्यगर्भाद्गौणी तदन्यसम्बन्धाच्छुद्धा चेति लक्षणाया द्वैविध्यम् ।[1]

नागेशं विहाय वैयाकरणा लक्षणावृत्तिं नैवामनन्ति इति तु प्रथितचरमेव । **नागेश** (१७ वीं० श०) गौण्याः पृथगस्तित्वस्य पूर्णप्रतिवादं व्यदधात् ।[2] **अन्नंभट्ट** (१६-१७ वीं० श०) स्वकीये तर्कसंग्रहे तदीयां दीपिकाभिधायां स्वोपज्ञटीकायां गौणीं लक्षणातोऽभिन्नामेव मेने यतो हि गौण्यपि गुणसम्बन्धरूपा लक्षणैव ।[3]

गोकुलनाथोपाध्यायः (१७०६ खी०) काव्यप्रकाशस्य टीकायां नृसिंहस्य मतमुपन्यस्तवान् । गौण्याः पृथगस्तित्वमनङ्गीकुर्वता तेन कथितं यद् गौणी पृथग्वृत्तिर्नैव । इयमेव ज्ञापनाय सारोपासाध्यवसाने भेदे शुद्धायामेव न भवतः गौण्यामपि भवतः ।[4]

---

१. तत्सादृश्येन प्रतिपादकत्वस्वरूपतया गौण्यपि लक्षणाप्रभेद एव .... तस्मात्सादृश्यगर्भतदन्यसम्बन्धनिमित्ततया गौणी शुद्धा चेति लक्षणाया एव द्वैविध्यम् ।

अप्पयदीक्षितः, **वृत्तिवार्त्तिकम्**, निर्णयसागरमुद्रणालयः, मुंबई, १६४० ई० पृ० १८

२. यत्तु गौणी न लक्षणान्तर्गता विशिष्टबुद्धियोगसम्बन्धे सत्यमेव लक्षणाऽप्रवृत्तेः............स्वनिरूपितविरोधाधिकरणत्वसम्बन्धेऽपि तस्याः क्लृप्तत्वात् ।

नागेशः, **वैयाकरणसिद्धान्तमञ्जूषा**, सम्पूर्णानन्दविश्वविद्यालयः वाराणसी १६७७ ई० पृ० २३

३. गौण्यपि लक्षणैव लक्ष्यमाणगुणसम्बन्धरूपा । यथा अग्निर्माणवक इति । **तर्कसंग्रहदीपिकाटीका** (टी० अन्नंभट्टः) उत्तरप्रदेशीयहिन्दीग्रन्थअकादमी, लखनऊ, १६७६ ई० पृ० १८८

४. गौणी तु न पृथग्वृत्तिरिति ज्ञापयितुं सारोपासाध्यवसाने विभज्यते । भेदाविमौ च सादृश्यात् ।

काव्यप्रकाशः सटीकः (टी० गोकुलनाथोपाध्यायः) पृ० ७०-७१

निष्कर्षरूपेण कथयितुं शक्यते यत्प्राचीनाऽऽलङ्कारिकाः प्रायो लक्षणायाः स्थाने गुणवृत्तिशब्दस्यामुख्यव्यापारशब्दस्य वा प्रयोगे दक्षा आसन्।[1] किन्तु ते मीमांसकविचारधारां तुच्छं मत्वा तान् नान्वयुः।[2]

पूर्वनिगदितचरमेव यद्गुणवृत्तेस्स्वरूपमानन्दवर्धनेन यथाङ्गीकृतं तत्तु मम्मट-प्रवर्तितलक्षणास्वरूपेण किञ्चित्साम्यं बिभर्ति, न पूर्णरूपेण। अभिनवगुप्तेन गुणशब्दस्य प्रयोगोऽमुख्यार्थे तथा साधारणधर्मस्यार्थे विहितः। गुणरूपाज्जायमानवृत्तिर्व्यापारो गुणवृत्तिरिति।[3] भट्टसोमेश्वरस्तन्त्रवार्तिकस्य गौणशब्दस्यार्थं विवृणोति-यत्र वाच्यार्थ आरोपितामवस्थां नैव लभते, तत्र प्रवर्तमानशब्दः मुख्य इत्युच्यते। गुणवृत्ति वं गौणीवृत्तेर्लक्षणम्।[4]

साररूपेण कथयितुं शक्यते यन्मीमांसका गौणीं लक्षणातो भिन्नां तथातिरिक्तां वृत्तिमङ्गीकुर्वन्ति। कुमारिलभट्टादिभिः लक्षणाया गौण्याश्च परिभाषानेकरूपेण विहिता। अष्टमशताब्दिपर्यन्तं गौण्या लक्षणायाश्च पूर्णपार्थक्यं दृष्टिपथमवतरति। आदौ मुकुलभट्टः स्वकीयायामभिधावृत्तिमातृकायां लक्षणाया द्वितीयभेदेन उपचारेण गौणीं

---

१. गुणवृत्तिरमुख्योऽभिधाव्यापारः। ध्वन्यालोकलोचनम्, पृ० ३३

तथैव—काव्यलक्षणविधायिभिर्गुणवृत्तिरूपो वा। **ध्वन्यालोकलोचनम्**, पृ० ३४

२. लक्षणातो भिन्ना गौणीति ये तन्मतं रिक्ततरमिति सूचनपरम्।

काव्यप्रकाशः सटीक (टी० चण्डीदासः) जयकृष्णदासगुप्ता, विद्याविलास मुद्रणालयः, वाराणसी, १९३३ ई० पृ० ५१

तथैव—गौणीलक्षणातो भिन्नेति प्राभाकरः। तदयुक्तं तस्या लक्षणायामन्तर्भावादित्याह। प्रतापरुद्रीयम्, पृ० ४४४

३. गुणतया वृत्तिर्व्यापारो गुणवृत्तिः।
ध्वन्यालोकलोचनम्, पृ० ४७०-४७१

४. वस्तुवृत्त्या स एवार्थो यत्र न पुनरारोप्यते तत्र प्रवर्तमानः शब्दो मुख्य इत्युच्यते, इतरत्र तु जघनवदारोपात् पश्चात्प्रवृत्तेर्जघन्यो गुणवश्च्चारोपात् गौण इत्युच्यते।....गुणयोगवृत्तित्वं गौणीवृत्तिर्लक्षणम्।

न्यायसुधा, (तन्त्रवार्तिकटीका) टी० सोमेश्वरभट्टः, चौ० सं० बुक० डिपो० वाराणसी, १९०१ ई० पृ० ५००-५०२

लक्षणाया अङ्गरूपेणोपस्थापयन् स्थायिरूपेण गौण्याःसमावेशो लक्षणायामेवाचीकरत्। यस्यानुगमनमजितसेनविश्वनाथविद्यानाथधर्मसूरिनागेशाप्पयदीक्षितप्रभृतिभिरालङ्कारिकैर्नैव विहितमपितु दार्शनिका अपि मतमेनमन्वययुः।

यैश्च दार्शनिकैर्मम्मटमतमुररीकृतं तेषु जगदीशतर्कालङ्कारधर्मराजाध्वरीन्द्रकणादतर्कवागीशान्नंभट्टादयो मूर्धन्यं स्थानं बिभ्रति। सहैवापरतः कतिपयेप्याचार्या ये मीमांसकभावभरिता मम्मटमतचिखण्डिषव आसन् ते मम्मटमत नानुजग्मुः। तेष्वाचार्येषु शालिकनाथभोजराजरुय्यकगागाभट्टादय आलङ्कारिका दार्शनिकाश्च प्रामुख्यं भजन्ते।

यद्यपि पुरा लक्षणायाः कृते आलङ्कारिका अपि गुणवृत्तिशब्दं व्यवहरन्तो दृष्टिपथमायान्ति, किन्तु तैर्मीमांसकवद्गौण्या लक्षणायाः पार्थक्यं नैवोररीकृतम्। लक्षणायामेव गौण्यास्समावेशस्तैरभीष्ट आसीत्।

वैदिकवाङ्मये अलङ्काराः

डॉ० हरिनारायणदीक्षितः

नैनीताल

Although, rhetorics are a later development in literature, the Vedas are not completely devoid of such expressions. The *alaṃkāras* such as *upamā*, *śleṣa*, *anuprāsa*, *rūpaka*, *atiśayokti* etc. have come there in a very natural way.

यद्यपि काव्यशास्त्रस्य वेदशास्त्रेण सह कोऽपि साक्षात्सम्बन्धो न दरीदृश्यते, यतोहि प्रभुसम्मितशब्दप्रधानेभ्यो वेदशास्त्रेभ्यः शब्दार्थयोः गुणभावेन रसाङ्गभूत-व्यापारप्रवणतया विलक्षणस्य लोकोत्तरवर्णनानिपुणस्य कान्तासम्मितोपदेशदायकस्य काव्यस्य शास्त्रं सर्वथा भिन्नमेवास्ति, तथा शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिष-छन्दोनामभिः षड्भिः वेदाङ्गभूतशास्त्रैरपि सह काव्यशास्त्रस्य न कापि साक्षात् संगतिर्नयनपथमवतरति; तथापि 'देवस्य पश्य काव्यं न ममार न जीर्यति' इत्यथर्ववेद (१०-८-३२) वचो विचिन्त्य एवञ्च तत्कर्तृकृते 'कविर्मनीषी परिभूः स्वयंभूः इत्यृग्वेदस्य ऋगंशे समुपलब्धं कविशब्दं विश्लिष्य वेदानामपि अजरामरकाव्यत्वसिद्धौ सत्यां तत्रापि काव्यत्वदर्शनाभिलाषा विदुषां विलसतितराम्। प्राचां भारतविदुषामपि इदमेव तात्पर्यमासीद् यद् अशेषाणां सत्यतावच्छिन्नविधानां प्रादुर्भावविकासौ वेदेभ्य एव भूतवन्तौ स्तः। एतादृशं किमपि ज्ञानं नास्ति सम्प्रति यस्य मूलं वेदेषु न भवेत्। विण्टरनित्स-मैक्समूलर-पीटरपीटर्सन-याकोबि-रॉथप्रभृतयो नूतनाः पाश्चात्त्यवि-पश्चिदपाश्चिमाः अपि ऋग्वेदं विश्वसाहित्यस्य प्राचीनतमं ग्रन्थं मन्यन्ते। वेदशब्दोऽपि ज्ञानार्थक एवास्ति। अस्माद्धेतोः संसारस्य सर्वविधं नाम ज्ञानं ज्ञानप्रकारो वा वेदेषु लब्धुं शक्यते।

भारतीय-ज्ञान-सूर्योऽपि ऋग्वेदकाले एव उदयं प्राप्तवानासीत् । अहं सर्वप्रथमन्तु ऋग्वेदस्य प्रारम्भिकीं साहित्यिकीं सुषमामवलोकयामि । आस्माकीनाः पूर्वजाः उद्दामिन्याः निरङ्कुशायाः प्रकृतेः उन्मुक्ते मनोहरे प्राङ्गणे निवासं कुर्वन्ति स्म । अतः काले काले प्रकृतिः स्वीयकृपाकोपाभ्यां तान् प्रभावयति स्म । तदानीं प्रकृतिप्रभाविताः ते पूर्वजाः प्राकृतिकीं शक्तिं तस्याः कृपावृद्धये कोपशान्तये वा एकाग्रमनसा स्तुवन्ति स्म । हृदयान्तरालाद् विनिर्गताः तेषां ताः स्तुतयो भृशं मार्मिक्यः सौन्दर्यवत्यश्च भवन्ति स्म । अतएव तत्र सर्वत्र अनायासेन एवागतं स्वाभाविकं काव्यत्वं विदुषां मनोहरणाय कल्पतेतरामेव ।

केषाञ्चिद् विदुषां तु कथनमस्ति यत् वेदेषु ध्वनि-गुण-रस-रीत्यलङ्काराः सर्वे एव काव्यशोभाधायका भेदाः सन्ति, सर्वञ्च तैः रूपक-उत्प्रेक्षा-अतिशयोक्ति-व्यतिरेक-श्लेषादीनामलङ्काराणां तु केचित् संकेता अपि प्रदर्शिताः सन्ति[1] ; किन्तु डा० एस० के डे महोदयाय वेदेषु अलङ्कारबाहुल्यदर्शनं नैव रोचते ।[2] अयं महोदयो वेदेषु काव्यत्वमलङ्कारत्वं वा मन्यते तु, किन्तु काव्यत्वस्य अलङ्कारवत्वस्य तत्र किमपि विशिष्टं महत्त्वमुररीकर्त्तुमयं न सज्जितो भवति ।

मामकीना अल्पीयसी शेमुषी तु इदमेव निश्चेतुमीहते यत् लौकिकसंस्कृत-कविताकामिनीकान्तकलेवरक्रान्तमानसाः कालिदासीयोपमामाधुरीमत्ताः महाकविदण्डि-पदलालित्यलीनचेतसो बाणभट्टीयरसभावपेशलतापाशबद्धाः भावुकाः सहृदयहृदयाः सुकुमारमतयो विपश्चितो भवन्तु नाम वेदवाङ्मये काव्यमाधुरीप्राप्तिप्रयत्ने व्यर्थ-परिश्रमाः, किन्तु निर्विशेषमतयो विद्वांसस्तु तत्रापि स्थाने-स्थाने काव्यात्मकं सौन्दर्यं नयनपथातिथीकर्त्तुं प्रभवन्त्येव ।

अथाहं कतिपयानि एतादृशानि उदाहरणानि प्रस्तुतीकरोमि यानि वैदिक-वाङ्मये अलङ्काराणाम् अव्याजमनोहरीं हृत्तन्त्रीझङ्कारिणीं सत्तां सूचयितुमेव नहि, अपितु निर्धारयितुमपि क्षमन्ते ।

---

१. (क) आचार्यविश्वेश्वरः स्वकृतकाव्यप्रकाशटीकाभूमिकायाम् ।

(ख) पी० वी० काणे महोदयः स्वकृते 'हिस्ट्री आफ संस्कृत पोएटिक्स' ग्रन्थे हिन्द्यामनूदिते-४०५-४०८ पृष्ठेषु ।

(ग) श्री एच्० एस्० डिवेकरः, 'ले फ्ल्योर द रेतोरिक द लॉंद' नाम्नो ग्रन्थस्य द्वितीयपरिच्छेदे । अयं ग्रन्थः पेरिसे १९३० ख्रिष्टाब्दे प्रकाशितोऽस्ति ।

२. दृश्यतां तस्य 'हिस्ट्री आफ संस्कृत पोएटिक्स ग्रन्थस्य प्रथमभागे ३४१ तमं पृष्ठम् ।

सर्वप्रथमं सर्वालङ्काराणां मूलभूता[3] उपमा[4] एव भवन्नयनयोरुपहारीक्रियते। यथा—

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ॥

ऋग्वेदे १/११५/२)

अत्रायं भाव —

सरणशीलः सूर्यो देदीप्यमानाम् उषसं तथैव अनुधावति अनुसरति वा यथा (रिरंसुः) मनुष्यः सुन्दरीं युवतिमनुसरति। अत्र ऋषिदृष्टौ सूर्यः उपमेयः, तस्य मनुष्यः उपमानम्; एवमेव उषाः उपमेया, तस्याः युवतिः (योषा) उपमानम्; इवार्थको वैदिको 'न' शब्द एव उपमावाचकः शब्दः; अनुधावनमनुसरणं वा साधारणधर्मः। विचार्यतान्नाम तावत् यदत्र उपमायाः सर्वेषामेवाङ्गानां विद्यमानत्वात् पूर्णोपमा केषां सचेतसां मनो नाहरति ? यथा वा—

परा हि मे विमन्यवः पतन्ति वस्य इष्टये।
वयो न वसतीरुप ॥

— (ऋग्वेदे १/१८/४)

अस्यामृचि ऋषेः शुनःशेपस्य मन्युरहिताः बुद्धयः वसुमते जीवनाय तथैव परापतन्ति यथा पक्षिणो नीडाय परापतन्ति। अत्रापि उपमेयोपमानभावो हृदयहरः प्रतिभाति। यथा बुद्धयः उपमेयाः, तासां पक्षिण उपमानम, इवार्थको 'न' शब्द एव अत्रापि उपमावाचकः शब्दोऽस्ति, परापतनं प्रत्यावर्तनं च साधारणधर्मो दृश्यते।

यथा वा—

प्र तद्विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा ॥

(ऋग्वेदे १/१५४/२)

अस्मिन् मन्त्रे तु श्लेषपुष्टोपमायाः सौन्दर्यं हृदयहरत्वं वा दर्शनीयतायाः सीमानमेव स्पृशति हृदयतन्त्र्याश्च ताराणि झङ्करोति।

---

३. **उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान्।**
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥

— अप्पयदीक्षितः चित्रमीमांसायामुपमानिरूपणारम्भे।

४. साद‍ृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालंकृतिः।

— पण्डितराज जगन्नाथो **रसगङ्गाधरे।**

ऋचो भावोऽस्ति यद् भीमः आकृत्यैव भयङ्करः, कुचरः कुत्सितं जीवघात-पुरस्सरं चरति यः सः कुचरः कुत्सिताचरणशीलः; गिरिष्ठा; पर्वतादिप्रदेशवर्त्तिगह्वर-वासी मृगः सिंह इव भीमः शत्रुभयदः कुचरः = कुषु सर्वासु भूमिषु (त्रिषु लोकेष्विति-चरति यः स कुचरः सर्वव्यापी, गिरिष्ठाः गिरि = मन्त्ररूपायां वाचि तिष्ठति यः स गिरिष्ठाः (सप्तम्या असुक्) विष्णुः वीर्येण (हेतुना) सर्वैः स्तूयते ।

अत्र विष्णुः उपमेयः, तस्य मृगः (सिंहः) उपमानम् । सादृश्यार्थको वैदिको 'न' शब्द एव उपमावाचकः शब्दः तथा स्तुतिविषयता एव उभयोः साधारणधर्मः । भीमत्वं कुचरत्वं गिरिष्ठत्वञ्च श्लेषसाहाय्येन उभयधर्मीणि सन्ति ।

यथा वा—

रथीव कशयाश्वाँ अभिक्षिपन्

आविर्दूतान् कृणुते वर्ष्याँ३ अह ।

(ऋग्वेदे ५/८३/३)

एष भावः—

यथा रथी कशया अश्वान् अभिक्षिपन् प्रेरयन् स्वदूतान् भटान् आविष्कुरुते तद्वदेव असौ पर्जन्योऽपि मेघान् प्रेरयन् वर्ष्यान् वर्षणशीलान् तान् मेघान् दूतान् इव आवि-ष्कुरुते । अत्र पर्जन्य उपमेयः, तस्य रथी उपमानम् । एवमेव मेघाः उपमेयाः, अश्वा उपमानम् । इव शब्द उपमावाचकः । आविष्करणमुभयोः साधारणधर्मः ।

यथा वा

अयमु ते समतसि कपोत इव गर्भधिम् ।

वचस्तच्चिन्न ओहसे ।।

(सामवेदे पूर्वार्चिके २/६/८)

अयं भावो यद् यथा कपोतः सत्वरं स्वकपोतीं प्राप्नोति तथैव इन्द्रोऽपि सत्वरं स्वयज्ञं (स्वयज्ञवेदिम्) प्राप्नोति । अत्रापि उपमानोपमेयाद्युपमावयवाः न कस्यापि तद्विदो निगूढाः ।

न केवला उपमा एव लभ्यते वेदेषु, अपितु मालोपमा[५] अपि दरीदृश्यते—

'अभ्रातेव पुंस एति प्रतीची

गर्तारुगिव सनये धनानाम् ।

जायेव पत्य उशती सुवासाः

उषा हस्रेव निरिणीते अप्सः ।।

(ऋग्वेदे १/१२४/७)

---

५. मालोपमा यदेकस्योपमानं बहु दृश्यते ।

— विश्वनाथः साहित्यदर्पणे १०/२६ पूर्वार्धे ।

अत्र एकस्या एव उषसश्चत्वारि उपमानानि राजन्ते ।

अथाहमेकमेतादृशमुदाहरणं प्रस्तौमि यस्मिन् न केवलाया उपमाया एव चाक्यचिक्यता, अपितु विरोधाभासस्यापि मनोरमा सत्ता आन्दोलयति तद्विदां चेतः । दृश्यताम्—

'उत त्वः पश्यन् न ददर्श वाचम्
उत त्वः शृण्वन् न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे
जायेव पत्ये उशती सुवासाः ॥

(ऋग्वेदे १०/७१/४)

अयं भावः—

अनेके जनाः विद्यां पठन्ति, किन्तु तस्याः रहस्यं न विदितं भवति; एवमेव अनेके जनाः वाचो रहस्यं शृण्वन्ति; किन्तु तेषां बुद्धौ तद् रहस्यं स्फुरति नैव । किन्तु केचिद् एतादृशो बुद्धिमन्तो भाग्यवन्तो वा सन्ति येषां समक्षं वाणी स्वीयं सर्वमपि गुप्तरहस्यं तथैव प्रकटीकरोति यथा रिरंसुः काचिद् अलङ्कृता पत्नी पत्युः समक्षं स्वीयं समर्पयति ।

अत्र वाग् उपमेया, तस्यां उपमानमस्ति जाया । इव शब्द एव उपमावाचकः, आत्मसमर्पणमुभयोः साधारणधर्मोऽस्ति । अत्र उपमानमतीव श्रृङ्गारप्रेरकमस्ति, किन्त्वस्ति ह्यनवद्यम् । अस्य ऋचः पूर्वभागे (उत त्वः पश्यन् न ददर्श वाचम्, उत त्वः श्रृण्वन् न श्रृणोत्येनाम् ।) विरोधाभासालङ्कारस्यापि महत्सुन्दरमुदाहरणद्वयं वरीवृत्यते । 'पश्यन्नपि न पश्यति' 'श्रृण्वन्नपि न श्रृणोति' इत्यहो कीदृशो मनोहरो विरोधः ? एवञ्च परमरहस्यभूता सा वाक्; अतएव दृष्ट्वाप्येनां न द्रष्टुं (ज्ञातुं) पारयति कश्चिद्; एवमेव श्रुत्वापि एनां न श्रोतुं प्रभवति कोऽपीति तत्परिहारोप्यत्याह्लादकरो मनोरमश्च ।

एतदनन्तरं मया एका एतादृशी ऋक् प्रस्तूयते यस्यामतिशयोक्ति-अनुप्रास-विभावना-विशेषोक्तिनाम्नां चतुर्णाम् अलङ्काराणां मनोहरी सत्ता पाठकानां मनांसि हठात् आवर्जयति । दृश्यतां सेयम्—

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति
अनश्नन्नन्यो अभिचाकशीति ॥

(ऋग्वेदे १/१६४/२०)

मन्त्रस्य भावोऽस्ति यत् शोभनपक्षवन्तौ सहनिवासिनौ सखायौ द्वौ पक्षिणौ एकमेव वृक्षमधिश्रयन्तौ स्तः। तयोरन्यतरस्तु वृक्षस्थितं फलं भुङ्क्ते, किन्तु अन्यः फलम् अभुञ्जान एव स्वीयं तेजः प्रकटयतीति ।

वस्तुतस्त्वस्मिन् मन्त्रे दर्शनशास्त्रस्य ईश्वर-जीव-प्रकृतिसंज्ञकानां त्रयाणां मूलभूतानां तत्त्वानां प्रतिपादनं रूपकालङ्कारस्य समाश्रयेण कृतमस्ति। यथा हि – ईश्वरः प्रकृतिमाध्यमेन सृष्टिमुत्पादयति, जीवश्च तस्यां सृष्टौ स्वकीयकर्मानुसारेण सुखदं दुःखदं वा फलं भुङ्क्ते। किन्तु ईश्वरः प्रकृतिजं फलमभुञ्जान एव सर्वं शास्ति, सर्वं च द्योतयतीति भावः। परन्तु ऋषिणा मन्त्रेऽस्मिन्नीश्वर-जीव-प्रकृतीनां वर्णनं, तेषां नामानि न गृहीत्वा, पक्षिद्वयवृक्षनामभिः विहितमस्ति। अहमाशङ्के यदस्यामृचि केचिद् विद्वांसो रूपकालङ्कारं सम्भाव्य अस्या इत्थम्भूतां व्याख्यां कर्त्तुकामा भवितुं शक्नुवन्ति यत् प्रकृतिः एकविशालवृक्षरूपा विद्यते। ईश्वर-जीवौ अपि पक्षिद्वयरूपौ स्तः, तौ च पक्षिरूपौ ईश्वरजीवौ वृक्षरूपां प्रकृतिमाश्रयेते। तयोः ईश्वरजीवयोरन्यतरः एको जीवस्तु कर्मानुसारेण सुखं दुःखं वा अश्नाति; किन्तु अन्यः पक्षी अर्थात् ईश्वरस्तु फलं न भुञ्जान एव सर्वतः स्वीयं सौन्दर्यं तेजो वा वितनोतितराम्। किन्तु मह्यन्तु अत्र अतिशयोक्तिरेव रोचते न तु रूपकम्। यतोहि मम मतेन रूपक-अतिशयोक्तिभेदिका संस्फुटा रेखा उपमेयस्य सत्ता असत्ता एवं वर्तते, न तु अभेदप्रतीतिः। यतोहि सा तु उभयत्र लभ्यास्ति। मामकोऽयं भावोऽस्ति यद् यत्र उपमेयं शब्दोपात्तं भवेत् तत्र रूपकमेव, न तु अतिशयोक्तिः, यत्र च उपमेयं शब्दोपात्तं भवेत्, अर्थात् तस्य दर्शनमेव न भवेत् केवलमुपमानमेव शब्दोपात्तं स्यात्, तत्रातिशयोक्तिरेव ज्ञातव्या। यथा—

'मुखचन्द्र उदेति' इत्यत्र रूपकम्। यतोहि अत्र उपमेयभूतस्य मुखस्य शब्दोपात्तता अर्थात् शब्दतः उपादानं (ग्रहणं) विद्यते। किन्तु मुखं निगीर्य अर्थात् शब्दतोऽनुदीर्य 'चन्द्र उदेति' इति कथने तु अतिशयोक्तिरेव मान्यास्ति। यतोहि अत्र उपमेयभूतस्य मुखस्य शब्दोपात्तता अर्थात् शब्दतः उपादानं (ग्रहणं) नैव विद्यते।

एवम्भूतया स्पष्टेक्षिकया विचारे विहिते सति दृश्यते यत् प्रकृते मन्त्रे परमात्म-जीवात्मरूपोपमेयस्य (विषयस्य) दर्शनं (शब्दोपात्तता) नास्ति। अत्र तु केवलं पक्षिद्वयरूपोपमानमेव (विषयी एव) दरीदृश्यते, तेन च पक्षिद्वयरूपोपमानेन ईश्वर-जीवरूपोपमेयस्य सर्वथा निगरणं विहितमस्ति। तस्मादत्रातिशयोक्तिरेव अङ्गीविधेयास्ति बुधैर्न तु रूपकम्। श्रीमदप्पयदीक्षितेन एतादृशी अतिशयोक्तिः रूपकातियोक्तिसंज्ञया व्याख्यातास्ति[६]।

---

६. रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः॥
कुवलयानन्दे कारिका ३६

न केवलन्तावदेतावदेव, अपितु अस्मिन् मन्त्रे 'सुपर्णा' 'सयुजा' 'सखायः' 'समानं' 'परिषस्वजाते' इत्यादिशब्देषु सकारस्य अनुप्रासेव स्वर्णे सौरभसंयोगोऽपि सम्पादितोऽस्ति। एवमेव मन्त्रस्थिते 'अनश्नन्नन्यः'. इति नकारस्य पौनः पुन्येन प्रयोगोऽपि सचेतसां चेतस्सु अनुप्रासस्य मधुरिमाणं परिवर्धयन्नस्ति, अत्रैव च 'अनश्नन् अन्यः अभिचाकशीति' (अर्थात् 'फलम् अभुञ्जानः सौन्दर्यं वितनोति) इति शब्दपुञ्जे विभावनालङ्कारस्यापि स्थितिः द्रढीयसी दरीदृश्यते। यतो हि यत्र हेतुं विनापि कार्यं भवेत् तत्र विभावना मन्यते[7] अत्र सौन्दर्यप्रकाशनरूपस्य कार्यस्य उत्पत्तिः सौन्दर्यहेतुभूतफलभक्षणं विनैव वर्णिता। अतो विभावना दुर्निवारास्ति।

एवमेव विशेषोक्तिरपि अस्मिन् मन्त्रे लोचनगोचरीभवति। यतोहि कारणे सत्यपि यत्र कार्योत्पत्तिर्न भवेत् तत्र विशेषोक्तिर्मन्यते[8]। फलाभक्षणं सौन्दर्याभाव-रूपकार्यस्य कारणमस्ति। अत्र 'अनश्नन् इति पादेन ईश्वरकर्तृकफलाभक्षणरूपकारणे सत्यपि 'अभिचाकषीति' इति सौन्दर्यबोधकक्रियापदेन सौन्दर्याभावरूपकार्योत्पत्तेरभावो-द्योत्यमानोऽस्ति। अतोऽत्र विशेषोक्तिरङ्लकारोऽप्यपरिहार्योऽस्ति।

अपि च, अस्मिन् मन्त्रे 'सयुजा' 'सखाया' इति विशेषणद्वयेन परमात्म-जीवात्मनोर्नित्यत्वं सच्चित्रूपत्वञ्चापि ध्वन्येते। अस्माद्धेतोः इमौ शब्दौ पदद्योत्यध्वने-रपि उदाहरणं भवितुमर्हतः। ईषद्विमर्शे कृते सत्येव चात्र माधुर्यगुणोऽपि स्फुटो भवन्नयनपद्धतिमवतरति।

इत्थमहमवलोकयामि यदस्यामेकस्यामेव ऋचि काव्यस्य भूयांसि तत्त्वानि विलसन्ति, यानि सहृदयहृदयप्रीणनाय सर्वथालं सन्तीत्यत्र न केषामपि धीजुषां विसंवादः सम्भवति। एवमेव अन्या अपीदृश्योऽनेका ऋचो वर्तन्ते यासु सुधियां काव्यतत्त्वाव-लोकनाभिलाषः पूर्त्तिमेति। अत्र तासु कतिपया प्रस्तूयन्तेऽपि। यथा—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्याँ आविवेश॥

(ऋग्वेदे) ४/५८/३)

स्पष्टमस्ति यदस्यामृचि व्यतिरेकातिशयोक्तिनामानावुभावलङ्कारौ राजेतेतराम्। अस्मिन् मन्त्रे वैयाकरणानां ब्रह्मसहोदरस्य उपमेयभूतस्य वर्ण्यस्य अर्थात् विषयस्य

---

७. विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते।

—विश्वनाथः साहित्यदर्पणे १०/६६ पूर्वार्धे।

८. सति हेतौ फलाभावे विशेषोक्तिः........।

—विश्वनाथः साहित्यदर्पणे १०/६७ पूर्वार्धे

'शब्दस्य' अध्यवसानं निगरणं विलोनीकरणं वा एकेन उपमानभूतेन विषयिणा महता वृषभेण कृतमस्ति । उपमेयं नात्र शब्दोक्तम् । अतोऽत्रातिशयोक्तिर्निर्बाधैव राजते ।

यदि च शृङ्गचतुष्टयवान् त्रिपात् सप्तहस्तयुक्तः शिरोद्वयसमेतः त्रिधा बद्धोऽयं वृषभः श्रङ्गद्वयवतः चतुष्पदः एकशिरोवतः ,एकत्रबद्धस्य च लौकिकस्य वृषभस्य अपेक्षया विलक्षणो मन्येत तदा तु व्यतिरेकालङ्कारमत्र[९] को नाम वारयितुमीष्टे ? एवमेव—

'द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परिद्यामृतस्य ।

(ऋग्वेदे १/१६४/११)

इत्यत्रापि द्वादशारम् ऋतचक्रमन्यलौकिकचक्रापेक्षया विलक्षणं सद् व्यतिरेकालङ्कारद्योतनाय कल्पतेतराम् ।

उदात्तसम्पद्वर्णनरूपस्य उदात्तालङ्कारस्य[१०] उत्कृष्टमुदाहरणमपि अथर्ववेदे तत्र लभ्यते यत्र ऋषिणा भारतभूमेः स्वरूपं वैभवं महत्त्वञ्च समुपवर्णितानि सन्ति[११]। इदं स्थलमतीव हृदयहरं तथा देशभक्तिवीजाङ्कुरपोषकं विद्यते । एवमेव क्रियादीपकालंकारोऽपि[१२] तत्र द्रष्टुं शक्यते[१३] । परमेषोऽस्ति अपरिपक्वरूपेणैव ।

वर्णानुप्रासप्रियता शव्दानुप्रासप्रियता च वैदिकेषु ऋषिषु बाहुल्येन दृश्येते । लौकिककाव्यकाराणामनुप्रासालंकारस्य[१४] प्राणवती तनुस्तत्र नितरां परिस्फुटन्ती परिलक्ष्यते । यथाहि—

क—हंसः शुचिषद् वसुरन्तरिक्षसद् होता वेदिषद् अतिथिर्दुरोणसत् ।
नृषद् वरसद् ऋतसद् व्योमसद् अब्जा गोजा ऋतजा अद्रिजा ऋतम् ।।

(ऋग्वेदे ४/४०/५)

---

९. उपमानाद् यदन्यस्य व्यतिरेकः स एव सः ।
श्री शर्मा जी ने अपनी योजना के सप्तम खण्ड रूप 'कल्पसूत्र' नामक ग्रन्थ में श्रौतसूत्र, शुल्बसूत्र, गृह्यसूत्र तथा धर्मसूत्र इन चार वर्गों में विभक्त 'कल्पसूत्र' नामक साहित्य का विवेचनात्मक तथा समालोचनात्मक विवरण प्रस्तुत किया है; उन्होंने इनके साथ ही पितृमेधसूत्रों तथा प्रवरसूत्रों का भी विवेचन किया है। भूमिकात्मक प्रथम अध्याय में विषय-प्रवेश तथा श्रौतसूत्रों के विकास का संकेत किया गया है; द्वितीय अध्याय में ऋग्वेदीय आश्वलायन तथा शाङ्खायन श्रौतसूत्रों; तृतीय तथा चतुर्थ अध्यायों में कृष्णयजुर्वेदीय बौधायन, वाधूल, मानव, भारद्वाज, आपस्तम्ब, काठक, सत्याषाढ, वाराह तथा वैखानस श्रौतसूत्रों; पञ्चम अध्याय में शुक्ल यजुर्वेदीय कात्यायन-श्रौतसूत्र; षष्ठ तथा सप्तम अध्यायों में सामवेदीय आर्षेयकल्प (अथवा मशक कल्पसूत्र), क्षुद्रकल्पसूत्र, जैमिनीय, लाट्यायन, द्राह्यायण तथा निदानसूत्र श्रौतसूत्रों; और अष्टम अध्याय में अथर्ववेदीय वैतान-श्रौतसूत्र के प्रतिपाद्य विषयों, भाषा-शैली, रचना-काल, प्रणेता, विविध भाष्यों तथा प्रकाशित संस्करणों का सम्यक् वर्णन है। नवम तथा दशम अध्यायों का विवेच्य विषय शुल्वसूत्र हैं। नवम अध्याय में शुल्वसूत्रों के स्वरूप एवं प्रयोजन आदि के निर्देश के पश्चात् दशम अध्याय में विद्वान् लेखक ने बौधायन, मानव, आपस्तम्ब, हिरण्यकेशीय (अथवा सत्याषाढ), कात्यायन, मैत्रायणीय तथा वाराह शुल्बसूत्रों का विस्तरेण विवेचन किया है। एकादश अध्याय में पितृमेधसूत्रों के स्वरूप एवं प्रयोजन के संकेत के पश्चात् बौधायन, भारद्वाज, आपस्तम्ब, मानव, आग्निवेश्य, कात्यायन, कौशिक, सत्याषाढ-हिरण्यकेशीय, गौतम, कौषीतक, शाङ्खायन, आश्वलायन, काठक, वैखानस तथा तैत्तिरीय पितृमेधसूत्रों का विशद विवेचन किया गया है। द्वादश अध्याय का विषय प्रवरसूत्र हैं जिसमें प्रवरसूत्रों के स्वरूप एवं प्रयोजन के उल्लेख के बाद बौधायन, आपस्तम्ब, आश्वलायन, कात्यायन, सत्याषाढ, मानव तथा वाराह प्रवरसूत्रों का विशद वर्णन है। त्रयोदश से अष्टादश अध्यायों में गृह्यसूत्रों का विवरण है। त्रयोदश अध्याय में गृह्यसूत्रों के विषय एवं प्रयोजन के वर्णन के उपरान्त चतुर्दश अध्याय में आश्वलायन, शाङ्खायन, शाम्बव्य (कौषीतकि) तथा अमुद्रित ऋग्वेदीय गृह्यसूत्रों; पञ्चदश तथा षोडश अध्यायों में बौधायन, मानव, भारद्वाज, आपस्तम्ब, आपस्तम्ब-यज्ञपरिभाषासूत्र, आपस्तम्बीय एकाग्निकाण्ड, काठक, लौगाक्षि, आग्निवेश्य, हिरण्यकेशीय, वाराह, वैखानस, नारायणीय मन्त्रार्षाध्याय, पारस्कर तथा बैजवाप इन यजुर्वेदीय गृह्यसूत्रों;

सप्तदश अध्याय में गोभिल, कौथुम, खादिर, द्राह्यायण, जैमिनीय तथा अप्रकाशित (गौतम-गृह्यसूत्र तथा छन्दोग-गृह्यसूत्र); सामवेदीय गृह्यसूत्रों और अष्टादश अध्याय में अथर्ववेदीय कौशिकसूत्र का विशद वर्णन है। सभी ग्रन्थों के वर्णन में यथासम्भव प्रतिपाद्य विषयों, भाषा-शैली, रचना-काल, प्रणेता, भाष्यों तथा प्रकाशित संस्करणों के विवरण दिए गए हैं। एकोनविंश अध्याय में गृह्यसूत्रों के आधार पर विवाह तथा उसके प्रकार; विंश अध्याय में विवाह-संस्कार; एकविंश अध्याय में शिशु-संस्कार (जातकर्म, नामकरण तथा उपनयन); द्वाविंश अध्याय में आह्निक कृत्य (होम, पञ्च-महायज्ञ, दर्शपूर्णमास, श्रवणा, आश्वयुजी कर्म, आग्रहायणीकर्म, कृषिकर्म तथा वृषोत्सर्ग); त्रयोविंश अध्याय में अन्त्येष्टिकर्म; चतुर्विंश अध्याय में श्राद्ध; पञ्चविंश अध्याय में श्राद्ध के विविध प्रकार (महापितृयज्ञ, पार्वणश्राद्ध, एकोद्दिष्ट, सपिण्डन, प्रतिसांवत्सरिक श्राद्ध, पिण्डान्वाहार्य, अष्टका श्राद्ध तथा अन्वष्टका) तथा ब्राह्मण-भोजन एवं श्राद्ध में प्रयोज्य पदार्थ वर्णित हैं। षड्विंश से अष्टाविंश अध्यायों में धर्मसूत्र-साहित्य का विवेचन किया गया है। षड्विंश अध्याय में धर्मसूत्रों के उद्भव और विकास, धर्मसूत्रों तथा गृह्यसूत्रों में सम्बन्ध, धर्मसूत्रों तथा धर्मशास्त्रों में सम्बन्ध, और मानव-धर्मसूत्र की समस्या पर विचार किया गया है। सप्तविंश अध्याय में गौतम, बौधायन तथा आपस्तम्ब इन प्राचीन धर्मसूत्रों; और अष्टाविंश अध्याय में वासिष्ठ, हारीत, हिरण्यकेशीय, शंख, वैखानस-धर्मप्रश्न तथा विष्णु इन अनतिप्राचीन धर्मसूत्रों के प्रतिपाद्य विषयों, भाषा-शैली, रचना-काल, प्रणेता, भाष्यों तथा प्रकाशित संस्करणों के विवेचन-वर्णन के बाद अन्य धर्मसूत्रकारों (अत्रि, उशना, कण्व, कश्यप, गार्ग्य, च्यवन, जातुकर्ण्य, देवल, पैठीनसि, बृहस्पति तथा भारद्वाज) का परिचय दिया गया है। धर्मसूत्रों का अवलम्बन करते हुए एकोनत्रिंश से चतुस्त्रिंश अध्यायों में क्रमशः वर्ण-व्यवस्था; आश्रम-व्यवस्था; गृहस्थाश्रम; वानप्रस्थाश्रम तथा संन्यासाश्रम; राज-धर्म; और शुद्धि (अथवा शौच), पाप तथा प्रायश्चित्त का विवेचन प्रस्तुत किया गया है। विद्वान् लेखक ने सभी विषयों का मूल ग्रन्थों तथा विविध भाषाओं में यत्र-तत्र प्रकाशित समालोचनात्मक ग्रन्थों एवं लेखों के आलोक में सर्वाङ्गीण प्रतिपादन किया है और स्थान-स्थान पर अपनी स्वच्छ, पक्षपातरहित एवम् अनतिवादी दृष्टि का परिचय देते हुए सन्तुलित निर्णय प्रस्तुत किया है।

ग्रन्थ के आरम्भ में प्राक्कथन के अतिरिक्त विषय-सूची तथा संक्षेप-सूची; और अन्त में अतीव उपयोगी उद्धरण-सूची, विशिष्ट-पद-सूची, पुस्तक-सूची तथा शुद्धि-पत्र हैं। प्रस्तुत ग्रन्थ सभी दृष्टियों से अत्युत्तम है और लेखक के मनोयोगपूर्वक कठोर परिश्रम एवम् अध्यवसाय का परिचायक है।

मानसिंह
हिमाचल प्रदेश विश्वविद्यालय
शिमला—१७१००५

ऋग्वैदिक भूगोल—लेखक डॉ० कैलाशनाथ द्विवेदी, डी० लिट्० । प्रकाशक साहित्य निकेतन, शिवाला रोड, गिलिस बाजार, कानपुर २०८००१ । प्रकाशन समय—मार्च, १९८४, पृष्ठ संख्या ३६३ । मूल्य १२५.०० ।

ऋग्वेद समस्त मानव जाति का प्राचीनतम पवित्र तथा उत्कृष्ट ज्ञान है जो हमें वरदान एवं आशीर्वाद रूप में हमारे पूर्वज ऋषियों द्वारा प्राप्त हुआ है । इससे आर्यों के तत्कालीन धर्म, साहित्य, दर्शन, भाषा, राजनीति, भूगोल, इतिहास, समाज एवं संस्कृति से सम्बन्धित पक्षों पर प्रकाश पड़ता है । लेखक डॉ० कैलाशनाथ द्विवेदी ने ऋग्वेद के प्रमाणों के आधार पर आर्यों के मूल निवास स्थान सप्तसैन्धव प्रदेश का वैज्ञानिक विधि से गवेषणापूर्ण भौगोलिक अध्ययन प्रस्तुत किया है ।

प्रथम अध्याय में सप्तसैन्धव प्रदेश के स्वरूप एवं सीमा विचारक्रम में लेखक ने विभिन्न मतों की समीक्षा करते हुये सप्तनदियों में सिन्धु, विपाशा, शुतुद्रि, वितस्ता, असिक्नी, परुष्णा और सरस्वती को मान कर मैक्डॉनल और कीथ आदि के मत का अनुमोदन किया है और सप्तसैन्धव प्रदेश को इन नदियों और उनकी सहायक नदियों के आस-पास का क्षेत्र माना है । बाद में आर्य लोग दूर-दूर तक फैल गये । सप्तसैन्धव के चारों ओर चार समुद्र थे । हिमालय और मूँजवत् उसकी उत्तरी सीमा थे । सप्तसैन्धव के पूर्वी किनारे से उत्तर प्रदेश, बिहार, बंगाल, आसाम तक समुद्र फैला था । यह तथ्य ऋग्वेद ओर भूगर्भशास्त्रियों से भी पुष्ट होता है ।

द्वितीय अध्याय में सप्तसैन्धव प्रदेश की जलवायु, ऋतुयें, प्राकृतिक वनस्पति, जीवजन्तु आदि पर प्रकाश डाला गया है । उस समय शीत का प्राधान्य था । वर्ष के लिये 'हिम' शब्द का व्यवहार इसको पुष्ट भी करता है । समुद्रों के विलीन हो जाने से जलवायु में अन्तर आ गया जिसका जीव जगत्, मनुष्य, वनस्पति आदि सभी पर प्रभाव पड़ा । सामान्यतया सप्तसैन्धव प्रदेश की समशीतोष्ण जलवायु के कारण कृषि, पशुपालन, स्वास्थ्य आदि से कर्मण्यता और सम्पन्नता आई जिसने ऋग्वैदिक संस्कृति को जन्म दिया । जलवायु के प्रमुख कारक उनके उपास्य देव बन गये और धर्म, दर्शन, शिक्षा, ज्ञान-विज्ञान का विकास हुआ । इस अध्याय में तत्कालीन खदिर,

अश्वत्थ, विभीतक आदि प्राकृतिक वनस्पतियों और विभिन्न जीवजन्तुओं और अयस् हिरण्य, पीतल आदि खनिज धातुओं का भी वर्णन किया गया है।

तृतीय अध्याय में सप्तसैन्धव प्रदेश की स्थलीय भौतिक संरचना पर विचार किया गया है। उस समय अधिकांश सीमान्त भूमि पर्वतीय थी जिसमें पश्चिम, पश्चिमोत्तर तथा उत्तर के हिमवन्त, मूजवान् आदि पर्वत थे। स्थल संरचना के संदर्भ में सप्तसैन्धव के मैदानी, कछारी भूभागों का भी वर्णन किया गया है। मैदानी भाग सिन्धु से लेकर सरस्वती के आगे यमुना नदी तक फैला था और अत्यन्त उपजाऊ था। सप्तसैन्धव की स्थलीय संरचना का अध्ययन वैदिक साहित्य में प्राप्त संदर्भों के आधार पर किया जाना चाहिये।

चौथे अध्याय में सप्तसैन्धव के नद-नदियों एवं निर्झरों का अध्ययन किया गया है। इन नदियों का महत्वपूर्ण योगदान यहाँ की संस्कृति के पल्लवन में रहा है। लेखक ने सिन्धु, तुष्टामा, अनिताभ, सुसर्तु, श्वेती, कुभा, आदि नदियों का प्रत्यभिज्ञानात्मक विवेचन किया है।

पाँचवे अध्याय "ऋग्वैदिक जलमंडलीय स्थिर रूप" में ऋग्वेद में उल्लिखित सप्तसैन्धव प्रदेश के जल के विविध स्रोत रूपों यथा सरोवर, सागर, नदियों, झीलों आदि का वर्णन किया गया है। उस समय खनित्रिम और प्राकृतिक दोनों प्रकार के सरोवर थे। हिमालय पर्वत के आसपास के भू-भाग के आन्तरिक परिवर्तनों से सप्तसैन्धव का उत्तरी समुद्र भी कश्मीर के शर्मणावत् सरोवर के रूप में अवशिष्ट रह गया। सप्तसैन्धव प्रदेश की जलवायु पर इन समुद्रों का प्रभाव विभिन्न प्राकृतिक रूपों (तापमान, वर्षा, जलवायु) के अतिरिक्त मानवीय जीवन की विविध प्रक्रियाओं पर दृष्टिगोचर होता है।

छठें अध्याय "ऋग्वैदिक आर्थिक भूगोल" में सप्तसैन्धव के निवासियों के खान-पान, वस्त्र, रहन-सहन, आजीविका पर प्रकाश डाला गया है। भोज्यान्नों में मुख्यतया यव था जो कि रोटी, चबेने, सत्तू और यवाशिरादि पेय रूपों में प्रयुक्त होता था। विशुद्ध और मिश्रित पेय पदार्थों के रूप में दुग्ध, दधि, मधु, सुरा, सोम, गवाशिर दध्याशिर, यवाशिर, त्र्याशिर आदि थे। पुरोडाश दूध में पका जौ का दलिया देवताओं को अर्पण किया जाने वाला प्रिय खाद्य पदार्थ था। कृषि, पशुपालन, आखेट, मत्स्योद्योग, चर्मोद्योग, वस्त्रोद्योग, आदि जीविका के प्रधान साधन थे। स्थलीय और जलीय दोनों मार्गों से व्यापार किया जाता था।

सातवें अध्याय "ऋग्वैदिक सांस्कृतिक भूगोल" में सप्तसैन्धव प्रदेश के धर्म, दर्शन, ज्ञान-विज्ञान, काव्य, आमोद-प्रमोद पर प्रकाश डाला गया है। इसमें भौगोलिक वातावरण को प्रभावित करने वाली प्राकृतिक शक्तियों यथा सूर्य, इन्द्र, वरुण, अग्नि

आदि शक्तियों और उनकी उपासना पद्धति का विवेचन किया गया है। ज्ञान-विज्ञान के अन्तर्गत लोक-परलोक, ग्रह-नक्षत्र, संवत्सर, ऋतु, मास, दिन-रात, तौलमाप आदि एवं ललित कलाओं के अन्तर्गत मूर्ति, चित्रकला, संगीत, नृत्य, वाद्यों, काव्य, साहित्य, गणित, ज्योतिष, चिकित्सा, शल्य क्रिया; आमोद-प्रमोदों में सोमपान गोष्ठी, रथधावन प्रतियोगिता, द्यूत क्रीडा आदि का वर्णन किया गया है।

अष्टम अध्याय में "राजनैतिक भूगोल" के अन्तर्गत राज्य-व्यवस्था, आर्यों के प्रमुख जनपद, कबीलों, अनार्यों के राज्यक्षेत्रों, पारस्परिक राजनीतिक संघर्षों और उनको प्रभावित करने वाले भौगोलिक कारकों का विवेचन किया गया है। सप्तसैन्धव प्रदेश में जन एवं सामन्तवादी राज्य-व्यवस्था प्रचलित थी जिसे कुलप, ग्रामणी, व्राजपति, विश्पति, राजा आदि नियमानुसार संचालित करते थे। जन एवं राज्यों की सम्पूर्ण व्यवस्था का उत्तरदायित्व राजा पर होता था। सप्तसैन्धव के अर्वावत् भाग के पुरु, यक्षु, अज, शिग्रु, शिम्यु आदि कबीलों का उल्लेख है। परावत भाग के अलिन, पक्थ, भलानस्, विषाणी आदि एवं अन्तर्वर्ती भाग के यदु, तुर्वश, द्रुह्यु, अनु आदि जनों का राज्य था। अनार्य आतियों में शक्तिशाली दास, एवं दस्यु थे जो अनेक उपजातियों के कबीलों में रह कर, सुदृढ़ पुर बना कर, आर्यों के विरुद्ध संघर्षरत रहते थे। पणि भी आर्यों के विरोधी सप्तसैन्धव प्रदेश के पश्चिमी और पूर्वी सीमान्त भागों में रहने वाली आदिम जनजाति के लोग थे, जिनकी समुद्री व्यापार मुख्य जीविका थी। इनका प्रदेश पर पर्याप्त राजनैतिक एवं सांस्कृतिक प्रभाव था। प्रभुत्व स्थापित करने के लिये आर्य समुदाय का अनार्य कबीलों से प्रायः संघर्ष होता था। इन युद्धों पर विशिष्ट स्थलीय संरचनाओं यथा पर्वतीय गुहाओं का सुदृढ़ दुर्गों के रूप में तथा प्रचण्ड मेघ-वृष्टि, और राज्यों की सीमा-रेखा निधारित करने वाली विशाल नदियों और उनकी बाढ़ आदि का भी विशिष्ट प्रभाव होता था।

नवें अध्याय में कीकट, गुंगु, रुशम, यति, वेतसु, सारस्वत आदि क्षेत्रों एवं उद्व्रज आदि तीर्थस्थान, नैचाशाख, भजेरथ दशव्रज आदि स्थानों और भरद्वाज, वसिष्ठ, विश्वामित्र आदि ऋषियों के आश्रमों की विवेचना की गई है।

इस प्रकार विद्वान् लेखक ने ऋग्वेद में प्रतिविम्बित सप्तसैन्धव प्रदेश की राजनैतिक, आर्थिक, भौगोलिक, ऐतिहासिक और सांस्कृतिक सामग्रियों पर जो प्रभूत प्रकाश डाला है वह अत्यन्त ज्ञानवर्धक है। परवर्ती संस्कृत-साहित्य में यह ज्ञान संस्कार रूप में घुला लक्षित होता है। आशा है, सप्तसैन्धव प्रदेश के उपर्युक्त विविध पक्षों के अनुसंधानात्मक अध्ययन के लिये जिज्ञासु विद्वानों को इस ग्रन्थ से नवीन दिशा एवं प्रेरणा मिलेगी। ग्रन्थ विषयवस्तु की दृष्टि से अत्यन्त उपादेय है। भाषा

सरल, प्रवाहमयी और प्रौढ़ है। मुद्रण, सज्जादि भी सुन्दर है। विद्वान लेखक की यह कृति हर दृष्टि से प्रशंसा के योग्य है।

भाया मालवीय

प्रवाचक
गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठ
इलाहाबाद

———

शान्त आरामः । **लेखकः**—शां० ग० मोघे महाराष्ट्रविश्वविद्यालये संस्कृत-विभागस्य प्राध्यापकः । **प्रकाशकः**—देववाणीमन्दिरम्, मुम्बई ४ । **प्रकाशनसमयः** १९८८ ई० । पृष्ठ संख्या ११४ । मूल्यम्—२० रूप्यकाणि ।

एकस्यैव लेखकस्य पञ्चचत्वारिंशन्निबन्धानां संग्रहात्मकोऽयं ग्रन्थः किमपि विलक्षणं वैशिष्ट्यं बिभर्ति । अत्र कासाञ्चन वैदुष्यस्य क्षेत्रे लब्धप्रतिष्ठानां व्यक्तीनां केषाञ्चन मनोहारिणां ग्रन्थानां च स्वकीयया दृष्ट्या परिचयं प्रस्तुवता लेखकेन मीमांसाधर्मशास्त्रनाट्यशास्त्रकोषपुराणोपनिषत्काव्यालङ्कारशास्त्राण्यधिकृत्य यथा-वसरमभिव्यक्ताः स्वकीया अभिप्राया बाहुल्येन संसूचनात्मका अल्पशश्च वैचारिकाः यथायथं निबद्धाः । गीर्वाणसुधापत्रिकाया अङ्केषु प्राक् क्रमशः प्रकाशितानामप्येषां लेखानां पी० वी० काणेस्मारकनिधेः मुम्बईस्थिताद् द्रविणसाहाय्यमासाद्यैकत्र ग्रन्थरूपेण तेषां सङ्कलनं विधाय प्रकाशनं विहितं विदुषा लेखकेन पाठकानामुपकाराय संस्कृतभाषायाः सेवायै चेति प्रमोदस्थानम् ।

देववाण्यां निहितानां भावानामभिप्रायाणां विषयाणां वा प्रकाशनं प्रसिद्ध-पाण्डित्यैः स्वकीयासु भाषास्वथ चाङ्ग्लभाषायां साधारणतो विधीयत इति दृष्टम् । देववाण्याः समुपासकस्तु लेखकोऽयं संस्कृतस्य विषयानधिकृत्य संस्कृतभाषायामेव प्रतिभाव्युत्पत्तिप्रसूतमभिप्रायं स्वकीयं निबध्नाति, विदुषां समक्षं तथैव प्रस्तौति चेति न केवलं संस्कृतविद्यां प्रत्यपि तु संस्कृतभाषां प्रत्यपि निष्ठाधिक्यं तदीयप्रचार-प्रसारकामना च लेखकस्यास्य व्यज्यते । तस्मादस्य ग्रन्थस्य लेखकः प्रकाशिका च संस्थैवंविधस्य ग्रन्थस्य प्रकाशनाय तत्परोभयथा श्लाघनीयतां यातः । संस्कृतस्य दुरवस्थाकालेऽपीदानीं तदीयोज्जीवनाय यतेते अथ चैतादृशो लेखको लभ्यते यमियं प्रोत्साहयतीति ।

अत्र मोघे महाशयस्य भाषा प्राञ्जला सरला सुबोधा प्रवाहमयी च विद्यते प्रस्तुतिश्चापि प्रसन्ना क्रमयुता दृश्यते । विषयाणां वैविध्यमिति नारुचिमुत्पादयति पाठकानाम् । मुद्रणं सज्जादिकं च साधु वर्तते ।

किशोरनाथ झा

प्रवाचकः
गंगानाथ झा केन्द्रीयसंस्कृत विद्यापीठम्
इलाहाबाद

इरा । **लेखकः**—प्रा० देवदत्तभट्टिः, संस्कृतविभागाध्यक्षः राजकीय महाविद्यालयस्य मालेर कोटलास्थितस्य । **प्रकाशकः**—जयश्री प्रकाशनम् ४/११५ विश्वासनगरम् शाहदरा, दिल्ली । **प्रकाशनसमयः**—१९८४ ई० । पृष्ठसंख्या ८३ । मूल्यम्—५० रु० ।

पद्यकाव्यस्य क्षेत्रे सर्वथा नवीनोऽयं प्रयोगोऽत्र कविना भट्टि महोदयेन विहितः । अत एव पुरातनाः भावाः प्रसिद्धानि छन्दांसि प्रचलिता रीतिश्चानेन परित्यक्ताः । अधुनिके वातावरणे भारतीयभाषासु लिखितानां काव्यानां प्रभावः कविवरेऽस्मिन् समधिकं परिलक्ष्यते । अत एव संस्कृतभाषां स्वीकृत्य स्वकायमभिप्रायं प्रकाशयति कविः काव्यस्य माध्यमेन । परिवर्तनमस्मिन्नपि क्षेत्रे चिकीर्षता कविना प्रस्तुतौ भावे भाषायां च सर्वथा नवीनमात्मप्रसूतं शिल्पं व्यवहरन्नात्मतुष्टिमनुभवति । भाषासु व्यवहृतानामथ च प्रसिद्धानां पदानामण्डाआलूप्रभृतीनां प्रयोगोऽत्र दृश्यते । रसस्यालङ्कारस्य रीतेर्ध्वनेर्वालङ्कारशास्त्रीयविषयाणां समावेशं नेच्छति कविस्तथापि वक्रोक्तितो नैव मुक्तिमलभत । सहृदयानां हृदयान्यावर्जयतीयमिरेति विद्वद्वरेण्यानां प्रशस्तिभिरिह प्रकाशिताभिः कोऽप्यवगन्तुं प्रभवेत् । काव्यं हृद्यं यद्यपि वर्तते तथापि प्रायेणात्राभिव्यक्तोऽभिप्रायः परस्परं विरोधितां भजते । तथा हि कविरत्र कथयति 'अकवितायामकविः संस्कारकरो भवति अस्पृश्यान् अपाङ्क्तेयान् विषयान् संस्कृत्य स सहृदयसामाजिकसंवेद्यान् करोति तान् परिष्कृत्य च साहित्यिकान् निर्माति' इति । किमयं संस्कारः परिष्कारः प्राचीनैर्दर्शितमार्गेण नैव भवितुमर्हति अपाणिनीयप्रयोगव्यवहारेण देशजपदसमावेशेनैव भवितुमर्हतीत्येवंविधाः बहवो वक्तव्यांशाः विचारणीयतां यान्ति । कश्मीरभवेन दार्शनिकमूर्धन्येन न्यायमञ्जरीकृता जयन्तभट्टेनोक्तम्—

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः ।
वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम् ॥
तैरेव कुसुमैः पूर्वमसकृत्कृतशेखराः ।
अपूर्वरचने दाम्नि वधत्येव कुतूहलम् ॥

अत एव वचनभङ्गीमात्रं नूतनतां भजते सा खलु अलङ्कारशास्त्रीयमर्यादापालनेनापि पाणिनीयानुशासनस्वीकारेणापि परिनिष्ठितपदप्रयोगेणापि भवितुमर्हति भवति च बहूनामद्यतनप्रसिद्धकवीनां कृतिषु च सन्दृश्यन्त अपि एते सर्वे।

वर्षाकालानन्तरं शरदृतुरायाति तदा पङ्किलं जलं नैर्मल्यं भजत एवं इरारचनाकारस्यापरा कृतिरितोप्यधिकां प्रौढिं भजिष्यत इति मन्ये।

किशोरनाथ झा

प्रवाचक :
गंगानाथ झा केन्द्रीय संकृत विद्यापीठम्
इलाहाबाद

अविनाशि। लेखकः—डा० विश्वनारायणशास्त्री एम० ए० डी० लिट्० साहित्यव्याकरणमीमांसाशास्त्री काव्यतीर्थः। भारतशासनस्य शिक्षाविभागीयसाहाय्येन प्रकाशितम्। **प्राप्तिस्थानम्**—सार्वभौमसंस्कृतप्रचारसंस्थानम्, डी० ३८/११० हौज कटोरा, वाराणसी। पृष्ठसंख्या १७ + १४८। **मूल्यम्**—पञ्चदशरूप्यकाणि।

संस्कृतसाहित्ये यथा पद्यानां प्राचुर्यं तथैव गद्यानां वैरल्यमल्पत्वं वा विदितमेव मतिमत्सु। पद्यानां निर्माणे यथा पाटवमुपलभ्यते कवीनां तथैव गद्यानां निर्माणं तेषां कृते प्रयत्नाधिकसाध्यं भवति। गद्यं हि कवीनां निकषमिति धीधनानां धारणा वस्तुतः यथार्थतामनुगच्छति। अत एव संस्कृतस्य गद्यकाव्यं परिमितमेवोपलभ्यते। दण्डिसुबन्धुबाणानां कृतिभिः दशकुमारचरितवासवदत्त-हर्षचरित-कादम्बरीभिः साकं मन्दारमञ्जरीशिवराजविजयादिकं गद्यकाव्यमङ्गुल्या निर्देष्टुं शक्यमेव विद्यते। परमिह गद्यकाव्यस्य निर्मितौ सफलः कविः नूनं श्लाघनीयतां याति।

उपन्यासस्तु गद्यकाव्यस्याद्यतनः प्रभेदो विद्यते। अत एव प्रतिपदोक्तमस्य लक्षणमलङ्कारशास्त्रेषु नैव दृश्यते। किन्तु रुचिकरोऽयं काव्यप्रभेदः सामाजिकानामित्यत्र नास्ति कस्यापि मतिमतो विवेचकस्य सहृदयस्य पाठकस्य वा वैमत्यम्।

प्रस्तुतस्योपन्यासस्य लेखकः प्रसिद्धपाण्डित्यः दर्शनस्य साहित्यस्य च नितरामभिज्ञः मातृभूमिप्रेम्णा प्रेरितः सन् विलक्षणामनितरसाधारणां सामग्रीं प्रस्तौति सामाजिकान् प्रतीत्यत्र नास्ति संशीतिलेशोऽपि। विनश्वरेऽप्यस्मिन् जगत्यविनाशि-

प्रेम स्थातुं प्रभवतीति प्रतिपाद्यं कविवर्येणैतिहासिकं विषयमासाद्य तमलङ्कृत्य स्वकीयाभिः कोमलकल्पनाभिः प्रदर्शितं प्रतिपदं मणिकाञ्चनयोगं विदधतेति पाठं पाठं ग्रन्थमेतमनुभूयते। अत एव कृतिरियं साहित्यअकादमीपुरस्कारेणापि तज्ज्ञैः सभाजिता।

यथैव शब्दानां चयनं तथैव प्रस्तुतिः रुचिकरा मधुरा च। भाषायां विद्यते प्रवाहः सरलता सुबोधता च। अभिव्यक्तिर्वैदुष्यपूर्णा या खलु विविधशास्त्राणामनुशीलन-परिपाकं लेखकस्य यथास्थानं व्यञ्जयति। देशभक्तिः कवेरतः स्वजन्मभूमेरेव विवरणं प्रत्तं तस्या एव गौरवगाथा च गीता। दुःखान्तोऽयमुपन्यासः भारतीयालङ्कारशास्त्रीय-रीतिप्रतिकूलमात्ररतापि कविना नवीना दिक् प्रदर्शिता स्वकीया प्रगतिशीलता चाभिव्यञ्जिता।

नृपतिः भास्करवर्मदेवोऽत्र नायकः असमप्रान्तीयः अथ च साधारणकुलोद्भवा माधवी नायिका सांसारिकीं बहुविधां विडम्बनां सहमाना सुखशानयै संघर्षरतैवाजीवनं समतिष्ठत। बाल्ये मातृपितृभ्यां विहीना जाता पश्चात् पितृव्येन वणिक्हस्ते विक्रीता सहोदराद् वियुक्ता च सौभाग्येन महाकालमन्दिराध्यक्षस्योपकण्ठमासाद्य देवदासिषु श्रेष्ठतां गता विविधानि शास्त्राणि समधिगतवती परं तारुण्यमासाद्य पुरुषं कामयमाना नद्या धारेव दैवयोगात् भास्करवर्मदेवस्य प्रियतमाभवत्। अत्रापि विविधविधां दैवीं यातनां सहमाना पश्चात् असहिष्णुतां भजमानया सपत्न्या कापालिकहस्ते पातिता। ततः समुद्धृतापि प्रियतमवियोगमसहमाना तदीयान्तिमसंस्कारावसरे वह्नौ तत्रैवात्मानं निक्षिप्तवतीति जीवनमेव कष्टमयम्। तस्मान्नश्वरेऽप्यस्मिन् संसारे लौकिक्याः सुखशान्ते रनुधावनं निष्फलमिति शिक्षापि लभ्यते अविनाशि च प्रेम इति तु दृश्यत एव, तस्मादन्वर्थकत्वं काव्यस्यास्य विभावनीयम्। एतादृश्या प्रौढकृत्या वस्तुतः संस्कृत-काव्यस्य समृद्धिर्जायत इति कविः प्रशंसाभाजनम् प्रकाशनाय कृतसाहाय्यं भारत-शासनमपि धन्यवादपात्रमिति शम्।

किशोरनाथ झा

प्रवाचकः
गंगानाथ झा केन्द्रीय संस्कृत विद्यापीठम्
इलाहाबाद

OUR CONTRIBUTORS

ANANTANAND, RAMBACHAN

Asstt. Prof. of Religion, St. Olaf College, North Field, Minnesota—55057.

BHATTACHARYA, RAMSHANKAR

D.38/8, Hauza Katora, Varanasi—221001.

BRAJESH, KRISHNA

Dept. of AIHC & Arch., Kurukshetra Univ., Kurukshetra (Hariyana)—132119.

CHAPEKAR, NALINEE

Bombay.

CHATURVEDI, BRAJ MOHAN

Head of the Dept. of Sanskrit, University of Delhi, Delhi.

CHATURVEDI, SIVADATTA SHARMA

Banaras Hindu University, Varanasi/G.28, Arvind Colony, B.H.U., Varanasi.

DIKSIT, HARINARAYAN

Nainital.

Varanasi/G.28, Arvind Colony, B.H.U., Varanasi.

DUBE, DEVI PRASAD

Dept. of AIHC & Arch., B.H.U., Varanasi—5.

DWIVEDI, LAV KUSH PRASAD

C/o. Dr. Om Prakash, Sarayu Colony, Teliar Ganj, Allahabad.

GUPTA, D. K.

Prof. and Head, Dept. of Sanskrit, Punjabi Univ., Patiala—147002.

HANDA, DEVENDRA

160/15-A, Chandigarh—160015.

OUR CONTRIBUTORS

JHA, KISHORE NATH

Reader, Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Chandra Shekhar Azad Park, Allahabad.

JOSHI, THAKUR DUTTA

Lakshmi Niwas, Opposite Police Line, Ratanada, Jodhpur.

KRISHNA, MURARI

Dept. of Ancient Indian and Asian Studies, Magadh Univ., Bodhgaya (Gaya).

KUMAR, LALIT

L. D. Museum, L. D. Institute of Indology, Ahmedabad—380009.

MALAVIYA, MAYA

Reader, Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad.

MISHRA, BINA

Manuscript Pandit, Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Chandra Shekhar Azad Park, Allahabad—211002.

NAWANI, N. P.

Dept. of AIHC & Ar., Kurukshetra Univ., Kurukshetra (Hariyana)—132119.

PANDEYA, A. N.

Prof. and Head, Dept. of Sanskrit, Kashi Vidyapeetha, Varanasi.

PANDEYA, HIRA LAL

Shri Mahanirvana Veda Vidyalaya, Daraganj, Allahabad.

PANDEYA, SUDHAKAR

E 1/91, Sector 14, Punjab Univ. Campus, Chandigarh—160014.

PATHAK, JAGANNATH

Principal, Shri Ranvir Kendriya Sanskrit Vidyapeetha, Jammu.

RAMANA, M. V.

Dept. of Sanskrit, Andhra Univ., Waltair—530003.

OUR CONTRIBUTORS

RAO, K. V. VENKATESWARA

Dept. of Sanskrit, Andhra Univ., Waltair–530003.

SHARMA, MADHURI

7, Church Lane, Allahabad–21.

SHARMA, S. K.

Senior Lecturer in Sanskrit, Govt. Rajindra College, Bhatinda–151001.

SINGH, MAAN

Dept. of Sanskrit, Himachal Pradesh Univ., Simla–171005.

SINGH, V. K.

Dept. of Sanskrit, Univ. of Allahabad, Allahabad.

TIWARI, PUSHPA

Dept. of AIHC & Arch., Univ. of Allahabad, Allahabad.

TIWARI, RAMA SHANKAR

20, Lakshman Puri Colony, Faizabad.

TRIPATHI, R. P.

Dept. of AIHC & Arch., Univ. of Allahabad, Allahabad.

TRIPATHI, PRABHA

Dept. of AIHC & Arch., Banaras Hindu Univ., Varanasi–5.

UPADHYAYA, U. N.

68, L (NER) Colony, Aishbagh, Lucknow.

VARMA, KUMUD

Dept. of AIHC & Arch., Univ. of Allahabad, Allahabad.

गैर्वाणीगौरवग्रन्थमाला

गीर्वाणवाणीगौरवभूतप्रत्ननूतनलघुग्रन्थानां सङ्कलनम्

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठशोधपत्रिकायाः
परिशिष्टम्

जगन्नाथप्रणीतम्

गोवर्द्धनकाव्यम्

(संपादकः जगन्नाथपाठकः)

शिवदत्तशर्मचतुर्वेदिप्रणीतम्

शोधशोभाशतकम्

हीरालालपाण्डेयविरचितम्

युतकयाचनम्

॥ श्रीः ॥

अप्रकाशितचरम्

श्रीगोवर्धनकाव्यम्

कविवरश्रीजगन्नाथविरचितम्

सम्पादकः

डॉ० जगन्नाथपाठकः

जम्मूस्थश्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठीय-
प्राचार्यः

गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः

Reprinted from Vol. 41 of the Journal of
Ganganath Jha Kendriya Sanskrit Vidyapeeth
Allahabad

सम्पादकीयम्

जगन्नाथनिर्मितस्य गोवर्धनकाव्यस्य सम्पूर्णपाण्डुलिपिरस्माभिः श्रीमतो डॉ० मुरलीधरपाण्डेयस्य (सम्प्रति, जम्मूस्थश्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठ-प्राचार्यस्य) माध्यमेन, उत्तरप्रदेशमण्डलान्तर्गतमीरजापुरीयखटखरियाग्रामवास्तव्यस्य स्व० पं० प्रेमनाथत्रिपाठिमहाशयस्य गृहात् उपलब्धा। एकविंशतिपत्रमयीयं नागरी-लिपिबद्धा। अस्यां प्रतिपृष्ठमष्टौ पङ्क्तयः, प्रतिपङ्क्ति च ३२,३३,३५ प्रायाण्यक्षराणि सन्ति।

अस्यैव काव्यस्य खण्डिताऽन्या चैका पाण्डुलिपिः प्रयागस्थहिन्दीसाहित्यसम्मे-लनस्य संग्रहालये प्राप्ता (संस्कृत कैट० ३१२४।१६१०)। इयं द्वादशपत्रमात्रा, नागरी-लिपिमयी च। आरम्भस्य समाप्तेश्च पत्राणि न सन्ति।

पूर्वां पाण्डुलिपिमाश्रित्य प्रस्तुते संस्करणे मयाऽन्यपाण्डुलिप्यनुसारं कतिपये पाठभेदाः संशोधनानि च प्रस्तुतानि।

प्रस्तुतस्य काव्यस्य कर्ता जगन्नाथः क इति चेदभिधीयते—अस्य काव्यस्य पाण्डुलिपिद्वयस्य पुष्पिकासु प्राय एवमुपलभ्यते—

इति श्रीगोवर्धने महाकाव्ये शुभाङ्के श्रीमद्गुरुधरणीधरचरणाब्जभ्रमरश्रीजगन्नाथ-कविकृते···· ··· इत्यादि। कोऽसौ धरणीधर इति जिज्ञासायां प्रमाणद्वयमुपस्थाप्यते।
१. त्रिवेणिकायाः कोविदानन्दस्य च कर्ता श्रीमानाशाधरभट्टः स्वनिर्मितायां कुवलया-नन्दस्य टीकायामलङ्कारदीपिकायां पद्यमिदं लिखति—

शिवयोस्तनयं नत्वा गुरुञ्च धरणीधरम्।
आशाधरेण कविना रामजीभट्टसूनुना॥

२. त्रिविक्रमविरचितस्य रामकीर्तिकुमुदमालानाम्नो ग्रन्थस्य टिप्पणीकारेण दुर्गाप्रसादत्रिपाठिना ग्रन्थान्ते लिखितम्—"श्रीविश्वम्भरात्मसम्भवश्रीगुरुधरणीधरश्री-धरचरणाराधनसावधानत्रिविक्रमकृता रामकीर्तिकुमुदमाला सम्पूर्णा" इति। अस्याः सम्पादकाः डॉ० चन्द्रभानुत्रिपाठिमहाशया एवं लिखन्ति—"अयमाशाधरभट्टः सप्त-दशशताब्द्या उत्तरार्द्धेऽष्टादशशताब्द्याः पूर्वार्द्धे चासीदिति त्रिविक्रमेण कविना सह तस्यैककालस्थितिरिति प्रमाणिता भवति। अनयोर्गुरुवरस्य धरणीधरस्यापि स्थिति-कालः स एवासीत्।

प्रस्तुतस्य काव्यस्य रचयितुर्गुरुर्धरणीधरोऽप्यभिन्न एव प्रतिभाति। अतएव तत्कर्तुः कवेः पूर्वोक्त एव समयो निश्चेतुं शक्यते। कैटलागसकैटलागरमग्रन्थेन (सं० ४९६) धरणीधरनामा कश्चित् रसवतीशतकस्य प्रणेतृत्वेन निर्दिष्टः। गोवर्धनकाव्यस्य पाण्डुलिपिरेका अलवरसंग्रहालयेऽपि निर्दिष्टा। सम्भवतस्तत्र जगन्नाथो धरणीधरस्य पुत्रत्वेन निर्दिष्टः।

कविः षट्सर्गमयीं स्वकृतिमिमां 'महाकाव्य' मिति निर्दिशति विपश्चितां मनो भक्तिरसार्द्रं कर्तुमस्य निर्माणे यत्न इत्याचष्टे च (१।३)। प्रथमसर्गस्य प्रथम पद्ये स बालत्रिपुरादेव्याः पदाम्बुजं स्मरति। काव्यस्यास्य कथावस्तु बालरूपस्य श्रीकृष्णस्याद्भुतचेष्टिताश्रयम्। कविरयमलङ्कृतशैल्या महाकवीन् भारविमाघश्रीहर्षप्रभृतीन् पदे पदेऽनुहरतीति स्फुटं प्रतीयते यत्र तत्रार्थान्तरन्यासादेरपि वर्तते सुचारुः प्रयोगः।

प्रथमःसर्गो धेनुकवधनामा, द्वितीयो नारदोपदेशाख्यः, तृतीयोऽन्नकूटमणिनामा, चतुर्थो गोवर्धनवर्णनाभिधेयः, पञ्चमः शक्रपरिभवाख्यः, षष्ठश्च गोविन्दाभिषेकोत्सवनामा।

आशासे गोवर्धनकाव्यस्य संस्करणमिदं विदुषां मुदे किञ्चित् प्रभवेदिति। काव्यस्यास्य प्रकाशनार्थमनुमतिप्रदानस्य कृते सम्पादकः प्राचार्यडॉ० गयाचरणत्रिपाठिमहोदयान् प्रति सादरमाभारभरितमात्मानमनुभवति।

—जगन्नाथपाठकः

जगन्नाथनिर्मितम्

गोवर्धनकाव्यम्

प्रथमः सर्गः

श्रियं गिरां मे वृजिनौघनाशनं तनोतु बालत्रिपुरापदाम्बुजम् ।
अनारतं यन्मुनिमस्तकालिभिः श्रितं परज्ञानसुधारसाप्तये ॥१॥

समाश्रये कश्यपवंशसम्भवं गुणान्वितं श्रीधरणीधराभिधम् ।
कृपाकटाक्षाशुगसङ्गमश्रिया श्रितं तमःसैन्यसमूहभिद्धनुः ॥२॥

कृतं जगन्नाथविपश्चितोत्तमं हरेः शिशोरद्भुतचेष्टिताश्रयम् ।
मनो महाकाव्यमिदं विपश्चितां समानयेद् भक्तिरसार्द्रतां भृशम् ॥३॥

अलङ्क्रियाहीनमकाव्यलक्षणं रसाश्रितं यद्यपि नैव मद्वचः ।
खलाः क्षमध्वं क्रियतें तथाप्यदो यथा तथा श्रीपतिकीर्तनं मया ॥४॥

श्रियः पतिर्यादववंशभूषणः श्रियाश्रितं शंसितगोव्रजं व्रजम् ।
अवातरल्लोकहिताय विद्विषां निहन्तुमुच्चैर्विवभः(?) सहाग्रजः ॥५॥

दधानमाकर्षणकम्पितस्तनीश्च्युतालकालीर्दधतीर्दधित्विषः ।
वृताः प्रसूनावनतैर्मधुव्रतैर्विलोलवल्लीरिव[1] वल्लवस्त्रियः ॥६॥

---

१. क. वल्लीर्विलोला इव ।

चकासयन्तं [1]व्रजवल्लवीजनं विलोकमानं नवनीतमग्रतः ।
घटाहितैर्व्वास्यहिमांशुमण्डलच्युतं सुधासारमिवाच्छवारिषु ।।७।।

अनोकहस्कन्धकृतासु वल्लवैः स्थिता वरत्रासु सह प्रगायतीः ।
परस्परोत्प्रेषणकम्पितस्तनीर्विनोदयन्तं शिथिलोरुवल्लवीः ।।८।।

विलाल्यमानान्नवनीतसञ्चयादुपाहितं गन्धवहेन वर्त्मनि ।
मनोहरं घ्राणवितर्पणं नृणां प्रसर्पयन्तं प्रतिवीथि सौरभम् ।।९।।

प्रपूर्णकल्पाद् गुरुदोहनीभराद् गभीरधारानिनदैः समुद्गतैः ।
समासजन्तं हृदयेषु जाग्रतां प्रबुद्धपारावतपीवरध्वनिम् ।।१०।।

भृशं गृहद्वारि कृतेषु केलये गृहानुकल्पेषु गृहेषु रेणुभिः ।
विवाहयद्भिः कृतगीतिपुत्रकानुपाश्रितं गोपकुमारिकाकुलैः ।।११।।

मृदालवालप्रतिबन्ध···कुलौ (?) निवेशयद्भिः प्रतिभूमिवृक्षकान् ।
वृतीर्वितन्वद्भिरभू (मू)न् परिप्रियान् परीतमाकल्पितकेलिदारकैः ।।१२।।

विकाशिनीलाम्बुजलोचनश्रिया विपाण्डुफेनौघदुकूलशोभया ।
मृदुस्वनद्भूरिमरालमालया श्रितं स्तुवन्त्येव कलिन्दकन्यया ।।१३।।
(कुलकम्)

अथोल्लसद्भिः सवयोभिरर्भकैर्विमुक्तवत्सोत्सुकनैचिकीचयैः ।
उदीरितोऽश्रावि वनाय विष्णुना विकुञ्चितोष्ठं मुरलीमृदुध्वनिः ।।१४।।

नवीनतापिच्छदलद्युतिस्ततस्तनूद्वहन् काञ्चनकान्तमम्बरम् ।
शिखण्डिपिच्छोच्छ्रितशेखरच्छविर्ललामगुञ्जास्रजदाम सन्दधत् ।।१५।।

सुरेन्द्रचापच्छुरितं सविद्युतं विडम्बयन्नम्बुघनं घनाघनम् ।
व्रजं विधायाध्वनि धेनुकं पुरो बलेन सार्धं सखिभिर्व्यलोकि सः ।।१६।।
(युग्मम्)

---

१. ख॰ कलं ।

मुखाब्जनिर्यन्मकरन्दशङ्कया मधव्रतैः प्रार्थितमोष्ठपल्लवे[1]।
स्मितं दधत्ताननुगृह्य चक्षुषा स चारयन् गा गहनं न्यविक्षत ॥१७॥

क्षरत्तुषाराम्बुकणानलिप्लुतान् विघूर्णतो मन्दनन(?) स्वनोद्धतान्[2]।
बृहल्लतां द् (?) नियतानलोकयत् पुरः स तापिच्छतरूनिभानिव ॥१८॥

प्रमोदबाष्पानिव पुष्पसञ्चयान् जहुर्विभातानिलवेल्लिता लताः।
तमीक्षमाणाश्च पुरो वमन्(?)द्रवो मनोनुरागानिव बालपल्लवान् ॥१९॥

शिरस्युदीर्णारुणरागरञ्जितानधोऽञ्जनश्यामलपल्लवव्रजान् ।
हरिस्तमालान्मदलोहिताननान् बहूनिवोदैक्षत नीलवाससः ॥२०॥

घनच्छदानां समतां गतं स्थितं तमालशाखासु शिखण्डिमण्डलम् ।
घनच्छविं कृष्णमवेक्ष्य केऽपि तान्युदीरयद् व्यक्तमबोधि वल्लवैः ॥२१॥

गवां निषेव्याः प्रततान शाद्वलीर्बहूलपाश्चारुमहीमहीयसीः।
परस्परेणेव नितान्तमीर्ष्यया समादधुः पुष्पफलानि वीरुधः ॥२२॥

वनं विशालद्रुमसम्पदाकुलं द्रुमाः प्रसूनौघनतास्तदाऽभवन् ।
प्रसूनसङ्घाश्च मधुव्रतावृता मधुव्रताः सान्द्रपरागरञ्जिताः ॥२३॥

गरीयसाऽऽपीनभरेण मन्थराः [3]कृतोर्ध्वहुङ्कारमपीतवत्सकाः।
निरीक्ष्य गोपैरुपरुध्य रक्षिता गवां गणाश्चेरुरितस्ततस्तृणम् ॥२४॥

द्रुमेषु वल्लीषु नदीष्वपक्रमं प्रसूनवृद्ध्या युगपत्प्रसारिणीम् ।
ऋतुश्रियं वीक्ष्य ननं……वः परप्रवृद्ध्या विकसन्ति साधवः ॥२५॥

---

१. ख °पल्लवम्।
२. ख °द्धुरान्।
३. ख कृतोरु° ।

द्युतोरसा स्वेदपृषद्भिरुद्यतैर्विडम्बयन्नभ्रमदभ्रतारकम् ।
मनोहरच्छायमुपाययौ हरिः सहानुगैः केलिकदम्बकाननम् ।।२६।।

उपाहृतं गोपकुमारकैर्मुदा विचित्रवर्णैः कुसुमैर्विचित्रितम् ।
कसा (ला)पविद्धैर्भ्रमरैरनुद्रुतं बलाच्युतावञ्चितदाम दध्रतुः ।।२७।।

फलानि जक्षुः कुसुमानि दध्रिरे व्यख(ष?)ण्डिषुः पल्लवखण्डमुत्सुकाः ।
मुदं दधानाः श्रुतिगीतयोस्तयोर्ललम्बिरे वृक्षलतासु वल्लवाः ।।२८।।

मनोज्ञतालीफलपाकसम्भवं पृथुप्रयत्नादुपनीतमर्भकैः ।
कषायितस्वादुपरी......वं सहानुगैरापिबतां बलाच्युतौ ।।२९।।[1]

कदम्बकिञ्जल्कशिखाविकम्पनः पुरः समालिङ्गितमाधवीभरः ।
कलिन्दजा[2]वीचिविमर्दनोऽनिलस्तयोरवाक्षीत् प्रणुदन् परिश्रमम् ।।३०।।

इति प्रभुं क्रीडनतत्परं परं न चक्षमे धेनुक उग्रविग्रहः[3] ।
क्रुधोद्धुरस्तत्र विवृद्धमत्सरा महं सहन्ते न परस्य दुर्जनाः ।।३१।।

ससम्भ्रमाक्रन्दितकीर्णकाननैर्वृतोर्ध्वलाङ्गूललतं परिद्रुतैः ।
गवां गणैस्त्रा(?)मपृथूकृतेक्षणं क्षणं निवृत्येक्षितमुच्छिरोधरैः ।।३२।।

खुराभिघातक्षुभितक्षमातलं पुच्छच्छदोद्धूनितरेणुमण्डलम् ।
समापतन्तं प्रसभं बिभित्सया स्फुरत्पतङ्गौघमिवाशुशुक्षणिम् ।।३३।।

---

१. क ग्रन्थे पद्यमिदं नास्ति ।
२. ख यमस्वसुर्° ।
३. ख नाम दानवः, इत्युदीरितः ।

घनान्धकारोज्ज्वलदन्तदन्तुरं बलाकिनं मेघमिवोग्रमाननम् ।
खरध्वनिं व्याददलं विपत्प्रदं ददर्श धीमानुपधेनु धेनुकम् ॥३४॥
(त्रिभिर्विशेषकम्)

रुषारुणोद्योतविशेषशोभितं स्फुरद्घनभ्रूलतया तरङ्गितम् ।
हलायुधः स्वस्य सरोजसुन्दरं मुखं दिनस्येव बभार भीषणम् ॥३५॥

अचीकथच्चैनमितीद्धसाहसादवैमि देवान् द्विषतस्तवेहितम् ।
उपेहि सद्यः फलमस्य कर्मणः परापकारी न चिराय जीवति ॥३६॥

ततो जपापुष्पवपुर्हलायुधः स धूमधूम्रश्च निशाचरेश्वरः ।
मिथोद्विषन्तावितरेतरं रुषाऽरुणान्धकाराविव तौ समीयतुः ॥३७॥

अनग्निमेन (?) द्वितयेन पादयोरमुष्य यावच्लिणिहान्त (?) धेनुकः ।
क्रुधा परावृत्य तमग्रहीत् पदोः स हस्तवांस्तत्र बली हली भृशम् ॥३८॥

विवर्तयन् भीमभुजेन दानवं निजोपरिष्टात् स नदन्तमुद्धुरम् ।
महोदयाद्रिं भ्रमदभ्रमुच्चकैर्जिगाय बालातपलोहितं हली ॥३९॥

तद्वक्त्रान्तर्निष्पतत्पत्त्रिमार्गे
प्राणज्योतिर्मण्डलं सञ्चकाशे ।
चक्षुः क्षोभं पश्यतामादधानं
विद्युज्ज्योतिर्नूनमभ्रान्तराली (ला?)न् ॥४०॥

अपतदथ पृथिव्यां धेनुको दानवेशः
शिरसि विबुधमुक्ता पुष्पवृष्टिर्बलस्य ।
युगपदमरवीथ्यां दिव्यवादित्रनादः
सकलसखिसमाजेऽचिन्तितश्च प्रमोदः ॥४०॥

इति निहत्य रिपुं सहरिर्बलः
समममसौ सखिभिः सुमनाः समैः ।
धुरि विधाय गवामपि मण्डलं
शुभगृहं प्रतिसायमुपासदत् ।।४२।।

इति श्रीगोवर्धने महाकाव्ये श्रीमद्गुरुधरणीधरचरणकमलचञ्च [री]क-श्रीजगन्नाथकविकृते धेनुक [व] धनामा प्रथमः सर्गः ।

———

अथ द्वितीयः सर्गः

चारयन्नुलपकोमले वने नैचिकीरथ कदाचिदच्युतः ।
शारदेन शशिनेव शोभिना नारदेन मुनिनाऽभ्यपद्यत ॥१॥

अर (न्त) रेण करजाग्रसंक्ष [ता ?] मुच्छलद्बहलरागसङ्गिनीम् ।
बिभ्रता शुभगुणौघशालिनीं वल्लकीमुरसि वल्लभामिव ॥२॥
(युग्मम्)

ह्युपेन्द्रमुपदेष्टुमिच्छया प्रेर्यमाणमविलम्बितक्रमम् ।
शारदं घनमिवानिलेरितं तं ददर्श गगने गदाग्रजः ॥३॥

अर्घकल्पनविधेर्विधित्सया यावदुत्सुकमभून्न तन्मनः ।
तावदस्य पुरतस्तपोनिधिः सन्निधिं समधिगम्य स स्थितः ॥४॥

अर्चिताय विदुषेऽद्भुताश्रयः सूनवेऽथ सुमनाः प्रजापतेः ।
विष्टपत्रितयभूरुपाहरद् विष्टरं सपदि विष्टरश्रवाः ॥५॥

अर्पयन्तमनवद्यदर्शनः पाद्यमाद्यमधिकृत्य कृत्यवित् ।
तं निविश्य कुशमुष्टिकल्पितं जल्पितुं [1]समुपचक्रमे मुनिः ॥६॥

दर्शनेन तव दीर्घदर्शन प्रापि कैटभरिपो पुरस्क्रिया ।
तर्पितस्य सुधया मनीषिणो नेतरेषु[2] पुनरीहते मनः ॥७॥

---

१. ख° तमु° ।
२. ख रेषु° ।

पाकशासनपुरःसराः सुरास्त्वत्प्रसादमधिगम्य निर्भियः ।
त्वत्पदाम्बुजधियोऽनपायिनीं स्वःश्रियं समुपभुञ्जतें चिरात् ॥८॥

अध्वरेषु हृतमन्त्रसेतुषु भूषणेषु गलितोपलेष्विव[1] ।
सन्निखन्य किल शङ्खमम्बुधेरुज्जहर्थ निगमानधिश्रियः ॥९॥

मग्नमूर्तिरधिकल्पमुत्थिते सागराम्भसि महीमहीयसि ।
दंष्ट्रया समुदहारि शुभ्रया लीलया स्रगिव विष्णुना त्वया ॥१०॥

वज्रखण्डकठिनं नखाङ्कुरैस्त्वं हिरण्यकशिपोरुरः पुरा ।
भक्तवत्सलतया तया हरे स्वःकपाटविकटं व्यपीपटः ॥११॥

वामनोऽपि भगवन्तवन्न (?) वानामभागमवतामपश्चिमः ।
विक्रमत्रयजितं त्रिविष्टपं संविधाय बलिमीशमच्छलत् ॥१२॥

क्षत्रजातकठिनांसघटनादक्षतः क्षतजपङ्कपाटलः ।
तावकः परपुरीश(?) सङ्गरे कुप्यदन्तकरुचिं व्यडम्बयत् ॥१३॥

रावणं यदवहत्य वज्रिणः प्राज्यराज्यमथ भद्रमातनोः ।
गीयसे स्म विदुषां वरैस्ततो रामभद्र इति भद्रलक्षणः ॥१४॥

जासितुं सपदि लोकविद्विषां देवकीजठरगः परः पुमान् ।
योगिनामविषयोऽपि गम्यते घोषवासिभिरघौघहृद् भवान् ॥१५॥

भूमिभारमवनेर्जिहीर्षुणा चेष्टयते यदिह बाललीलया ।
प्रेक्ष्य तत्सुमनसामहर्निशं प्राप्यतेऽनिमिषताफलं गणैः ॥१६॥

---

१. ख प्रच्युताश्ममु विभूषणेष्विव ।

मण्डनं किमपरं परं क्षितेर्मङ्गलं किमथवा व्रजौकसाम् ।
यत्त्वदीयपदपङ्कजाञ्जितं धाम नाम यदि धूतपातकम् ॥१७॥

श्रेयसीषुपनिषद्विशारदे नारदे गिरमुदीर्य संस्थिते ।
वाचमाचरणपूतभूतलः पूतनारिपुरिति स्म भाषते ॥१८॥

युज्यते मतिमतां वरत्वयोदीरितं सपदि दिव्यचक्षुषा ।
प्रष्टुमागमनकारणं पुनश्चापलं विवृणुते ममार्भता ॥१९॥

भारतीमिति निशम्य वैष्णवीमीशु (षु!) षां स तपसामथाश्रयः ।
ईप्सितं कलहकौतुकी मुनिर्व्याजहार हरिसन्निधौ पुनः ॥२०॥

सङ्गतः सपदि धेनुकारिणा किं विधातुमलमस्ति नो भवान् ।
इत्युपेन्द्र महसां निधे मया क्रीडितुं किमपि चारु दिश्यते ॥२१॥

विष्टपत्रयपते तवाज्ञया वासवध्वजमुदस्य वल्लवाः ।
अन्नकूटमुपकल्प्य तं गवां वर्द्धनं गिरिमुपार्चयन्त्विति ॥२२॥
. (युग्मम्)

ओमिति प्रणिगदन्तमुत्थितं पार्वणं विधुमिवोज्ज्वलत्प्रभम् ।
वीचिडम्बर इवाम्भसां निधेस्तं समीक्ष्य ववृधे मुदा मुनिः ॥२३॥

आशिषः समुपयुज्य जिष्णवे स्वः समेयुषि विधातुरङ्गजे ।
सन्निवर्त्य सुरभीः सहाग्रजः सोऽभ्यवर्तत गृहं गदाग्रजः ॥२४॥

दृशमथ दधतौ समुत्सुकेषु प्रतिवनवीथि शिखण्डिमण्डलेषु ।
शुभमृषिवचनं हृदि स्मरन्तौ व्रजमुपसेदतुरच्युतौ प्रहृष्टौ ॥२५॥

इति गोवर्धने महाकाव्ये श्रीमद्गुरुधरणीधरचरणकमलचञ्चरीकश्रीजगन्नाथ-कविकृते न(ना)रदोपदेशनाम द्वितीयः सर्गः ।

अथ तृतीयः सर्गः

सुरमुनिवचनेऽथ विश्वसन्तः सपदि समुत्सुकचेतसः समेताः ।
निजगृहविभवानुरूपमन्नं व्यधिषत गोपगणाः सह प्रियाभिः ॥१॥

अनुगृहमभिकाङ्क्षितं जनानां मनसि यदुद्गतमापुरेव ते तत् ।
किमिव न सुलभां(भं) निरस्तहेतौ सपदि विधावनुकूलतां प्रयाते ॥२॥

इदमिदमिति सत्वरं क्षिपन्तः
शकटगृहेष्व(?) थं स(सं) विधा (?) विभूतिम् ।
अभिनवमहजातकौतुकास्ते
बहुगुणितानि गतागतानि चक्रुः ॥३॥

दिशि दिशि परितस्तें (स्त) रे तदानी-
मुषसि विनिर्यति माधवे सबन्धौ ।
वधिरितजगदण्डखण्डचण्डः
पटहसहस्रसमुद्भवः प्रणादः ॥४॥

अथ परिदधतां विभूषणानि स्फुरितमणिद्युतिकर्बुराम्बराणि ।
सुललितगतिसुन्दरीजनानां समुदितसम्भ्रमयमविभ्रमा बभूवुः ॥५॥

परिलुलदलकद्युतिं दधानाऽनुपहितदक्षिणपादमण्डनैका ।
शिथिलितभुजवल्लिवल्लवस्त्रीस्खलदुरुकङ्कणझङ्कृति प्रतस्थे ॥६॥

अविरलपुलकाकुलं निजोरःस्थलमलमुच्चलितोरुहारशून्यम् ।
द्रुतपदमभिनिर्यती सखीभिः सह सहसा न विवेद काचिदन्या ।।७।।

अकलितविनिवेशमर्पयन्ती सपदि पदेषु विभान्ति भूषणानि ।
प्रियतममभितोऽभिवर्तमानं स्मितमुखमिन्दुमुखी चकार काचित् ।।८।।

व्रज ननु न नुमस्तव प्रतीक्षामिति युगपत् प्रतिवेशिनीभिरुक्ता ।
त्वरिततरमबोधि निर्व्रजन्ती धृतमपरा न विपर्ययेण वासः ।।९।।

मणिमयमवतंसमर्पयित्वा किरणविमृष्टकपोलमेककर्णे ।
तमितरमपि पाणिना ददाना द्रुतमितरा निरियाय पक्ष्मलाक्षी ।।१०।।

प्रतियुवति समागमप्ररूढां रुषमपहाय पिनद्धमण्डनश्रीः ।
व्यवहितमुपकण्ठ एव पूर्वं प्रियतममन्यतमोन्मनीचकार ।।११।।

मसृणनिजकपोलदर्पणेऽन्या प्रतिफलितं स्वसखीमुखं सपत्रम् ।
मुकुरमभिविलोकन्त्यवेक्ष्य द्रुतमगमन्न लिलेख पत्रलेखाम् ।।१२।।

विधुमुखि विदधासि किं विलम्बं त्वमिति समाह्वयतो विपक्षनाम्ना ।
द्रुतगमनसमुत्सुकाऽपि गोत्रस्खलितमबुध्यत नैव भर्तुरेका ।।१३।।

अयि सुतनु महोत्सवं समेहीत्यभिगदिता स्वसखीजनैर्नवोढा ।
त्रिचतुरपदमेत्य कान्तमेक्ष्य स्मितचकितास्यमसौ निवर्तते स्म ।।१४।।

इति सहरभसं विनिर्व्रजन्त्यः
कृतकलमङ्गलगीतिरक्त (?) वन्द्यः ।
व्रजपतिमुपगोपुरेऽभिषेदुः
सुरवनिता इव सुभ्रुवः समेताः ।।१५।।

विकचकलकदम्बनव्यमाल्यं स्फुरदचिरांशुलताम्बरं दधानम् ।
अभिनवशिखिचन्द्रकेन्द्रचापं शुचिकुरुविन्दसुरेन्द्रगोपजालम् ।।१६।।

जलगुरुजलदप्रभाभिरामं प्रशमितताप(?)मसूर्सु(?)रारिमारात् ।
घनसमयमिव क्षमामुपेतं ददृशुरुदञ्चितलोचनास्तरुण्यः ।।१७।।
(युग्मम्)

घनपणवमृदङ्गशृङ्गवंशीजलभवझर्झरगोमुखानकानाम् ।
ध्वनिरुदचरदुद्धुरः सुराणां गृहवलभीः प्रतिनादयन् जवेन ।।१८।।

अथ दलितमनःशिलानुलिप्ताः सुरुचिरघर्घरकिङ्किणीकलापाः ।
विरचितहरितालभक्तिभाजः सुरभिगणाः सुमनःस्रजो विचित्राः ।।१९।।

विविधमणिकलापकान्तिकीर्णैर्बहलविशेषितभक्तिभिः स्ववत्सैः ।
मणिमयरचितैरिवोधसेद्धा धुरि विहिता ययुरुत्सुकाः स्रवन्तः ।।२०।।
(युग्मम्)

श्रुतिपटमभिपूरयन् स वेणु-
ध्वनि[सु]धया हृदयानि भावयन्त्या ।
हरिरचलमनूघबाल (मनूच्चचाल) गोपीः
स्खलितगतीः स्मरजर्जराश्च कुर्वन् ।।२१।।

विरचितशुचिगीतयो विरेजुः
पथि पथि गोपगणाः सुमृष्टवेषाः ।
गिरिमहमुपदृष्टुमुद्ध(?)जन्तः
शरदमलाः कमलाकरा इवोत्काः ।।२२।।

व्रजति यदुपतौ पुरादमुष्मात् परिमुत्सववत्सलैः स्वलोकैः ।
प्रविततमपि वर्त्म धीरघोषैः शकटशतैरतिसङ्कटं बभूव ।।२३।।

अनुगतपवनैर्विधूयमानाः
परिकलिताः शकटेषु भूरिभूषाः ।
अभिनयमिव कुर्वते स्म……लाद्
वसनशिखाः कुसुमस्रजः पताकाः ।।२४।।

भृशकुसुमितवि (वी)रुधः समन्तात्
परिमलनिश्चलम(?)न्तभृङ्गगीताः ।
प्रमुदितशिखिताण्डवा वनाल्यः
समहर्षिताः कृतमङ्गला इवासन् ।।२५।।

विघटितगमनस्पृहाः स्वपोतैः प्रचलितपुष्पलतं स्तनं धयद्भिः ।
अतुलमुदमुपागमन् युवत्यः प्रणयवतीर्हरिणीर्विलोकमानाः ।।२६।।

इति विविधवनस्थलीः स पश्यन् कुसुमसमृद्धिमतीः समृद्धसत्त्वाः ।
नगपतिमभितः समाससाद सह रमणैर्व्रजयोगि (षि) तां समाजः ।।२७।।

अथ मुदितमनाः स तान्निरीक्ष्य व्रजपतिरुत्सवधित्सया समेतान् ।
उचितमभिदधे वचः प्रमोदं द्विगुणमिवोद्गमयन् मनःसु गोपान् ।।२८।।

गिरिरयमतिभाति वल्लभो वः कुरुत निवेशमुपत्यकासु गोपाः ।
इह विविधविधानमन्नकूटं ददततरामुपहारसम्पममुष्मै ।।२९।।

इति हरिगदितां गिरं निशम्य शकटशतादवतीर्य भारमारात् ।
द्रुतमुषसि समारभन्त सर्वे द्विजकृतमङ्गलमुत्सवं समुत्काः ।।३०।।

द्रुततरमुपकल्पयाम्बभूवुः क्षितिगतकल्पमहीरुहप्रकल्पाः ।
अतिगिरिवरमानमन्नकूटं प्रव (क) टितकौतुकवृत्तिगोपवर्याः ।।३१।।

तव विरचितमादरादमीभिर्गुरुमुपहारमुपादत्स्व मूर्तः ।
गिरिवरसुखसम्पदाममीषां सपदि समेधय संहतिं कृतार्थः ।।३२।।

इति गिरमभिधाय हृद्यहृद्यां गिरिशिखरे प्रकटीबभूव कृष्णः ।
भवदतुलसुखावतारहेतोरयमहमस्मि वदान्त(?)तीक्षितश्च ।।३३।।
(युग्मम्)

जय जय गिरिराज ते नमोऽस्तु प्रकटितरूपकृतार्थतां गताः स्मः ।
भवदुदयसमृद्धिशान्तिहेतोर्यदसि हरेरतनोस्तनोः सवर्णः ।।३४।।

विकसितनवपुण्डरीकरम्यं नयनयुगं करुणाकरम्भिगर्भम् ।
अधरितनवबन्धुजीवगुच्छामधरपुटीं मधुपैरुपासिताञ्च ।।३५।।

तुलदलककुलाकुलान्तमीषद्घनपरिवेषमिवेन्दुमाननञ्च ।
कुसुमितमिव मालयोरुवक्षः स्फुटमणिकुण्डलमण्डितौ च गण्डौ ।।३६।।

कलितमुरलिकञ्च हस्तमुच्चैर्धृतशिखिपिच्छमतुच्छकं शिरश्च ।
जननयनमधुव्रतैकवासं प्रतिजितकोकनदं च पादपद्मम् ।।३७।।

जलधररुचिरं वपुर्बिभर्षि
क्षणरुचिरोचिरुदारमम्बरञ्च ।
तदिह भवतु भूतये भवान्नः
सपदि गवामपि (धि ?) शर्म शैल धेहि ।।३८।।
(कुलकम्)

उपहितमिदमप्यशान तेऽन्नं
स्तवमपि कर्तुमनीश्वरास्तव स्मः ।
अतिशयितमहामहोमहिम्नां
क इह गुणानुपवर्णितुं समर्था (र्थः) ।।३९।।

एषामित्थं नतिततिभृतामर्च्चितः श्रीनिवासः
प्रीत्या प्रेयान् पुलकिततनुः प्रीतिमान् [सं]बभूव ।
भुक्त्वा वान्तव्यतिकरमगप्रख्यमाख्यातकीर्तिः
कल्याणीं तां तनुमिह तिरोऽधत्त गोवर्द्धनोऽद्रिः ।।४०।।

पूजां विधाय नगभर्तुरिति प्रतीताः
शीर्षप्रणाममितरेतरमालिलिङ्गुः ।
लक्ष्मीपतेः शुभमनर्घ्यमुदारमुच्चै-
रुच्चारयन्ति चरितञ्च तदा स्म गोपाः ॥४१॥

इति श्रीगोवर्द्धने महाकाव्ये श्रीमद्गुरुधरणीधरचरणाम्बुजमधुकरश्रीजगन्नाथ-कविकृतेऽन्नकूटमणिनामा तृतीयः सर्गः ॥

अथ चतुर्थः सर्गः

अथ विलोकयितुं रमणीयतां शिखरिणः परिणद्धमहोदयाम् ।
हरिनिदेशभृतः सह गोदुहां शिखरमारुरुहुर्विधुना गणाः ॥१॥

विततवंशवनाकुलितानिलं शमिततोयदतोयदवोद्गमम् ।
कमलसौरभसङ्गिमधुव्रतं प्रविततं विततं दधतं शिरः ॥२॥

निचितमश्मचयैर्द्विरदप्रभैर्द्विरददन्तविघट्टनविक्षतैः ।
गलितगैरिकनिर्झरनिर्भरैः सरुधिरैरिव तन्मुखरैः क्वचित् ॥३॥

जलधरध्वनिरोषितकेसरिप्रतिरवद्रुतमत्तमतङ्गजम् ।
स्फुटितनिर्भरहासिदरीमुखं विहगराजिविकूजितकाननम् ॥४॥

कुसुमभारविभुग्नशिखैर्मुहुर्मधुकरव्रजगीतमहोदयैः ।
अविरलच्छदकोमलकान्तिभिस्तरुभरैरभितः परिशोभितम् ॥५॥

(कुलकम्)

अद्रेः शोभामित्थमुद्वीक्ष्य हृद्यां प्रीतस्वान्तः कृष्णमुत्फुल्लनेत्रम् ।
ज्ञाताकूतः पूतनारिं विहस्य वाचामीशो रौहिणेयो बभाषे ॥६॥

पश्याच्युतास्यरुचिरां रुचिमुल्लसन्तीं
शोभां गुणैर्जितवतः परिभूय मेरोः ।
गोवर्द्धनस्य सुरसेवितपादभूमे-
र्धूमान्धकारिततनोरिव मेघवृन्दैः ॥७॥

मुक्ता मृगेन्द्रहतहस्तिशिरोविमुक्ताः
श्यामाश्मकान्तिशबलाः कुरुविन्दभूषु ।
गुञ्जाफलद्युतिभृतोऽत्र गिरौ गृ(ग्र)हीतुं
गोवर्द्धने रभसयन्ति किरातनारीः ॥८॥

रत्नच्छायस्फुरितमहेन्द्रेष्वासास्तोयाभारादलघु गतं बिभ्राणाः ।
धीरध्वानक्षुभितमृगेन्द्रव्यूहाः शृङ्गैर्धत्ते जलधरमालां शैलः ॥९॥

मरकतमयीं भूमिं प्राप्य प्रकाशमुपागतां
कनकतटभूच्छायां प्रातर्विभावसुपिङ्गलाम् ।
इह रविकरोद्योतभ्रान्त्याश्रयन्ति शिलोच्चये
तरुणशिशिरस्तोमच्छित्यै द्रुतं हरिणीगणाः ॥१०॥

ज्योत्स्नाशुभ्रा राजती भित्तिरुच्चैः सौवर्णाभि[1]र्भाति रेखाभिरेषा ।
अस्मिन्नद्रौ पिङ्गलाभिर्जटाभिर्भस्मश्येना[2] शङ्करस्येव मूर्तिः ॥११॥

इह हेमतटीं पटीयसीं स्फुटितां रत्नकरैर्विकस्वरैः ।
ज्वलितज्वलनाभिशङ्कया शलभानामभिपित्सति व्रजः ॥१२॥

दीप्तज्वालज्वलनरुचिरस्वर्णपूर्णार्द्धभागा
दुर्वर्णस्य स्फुरति परित[3]श्चन्द्रिकाभास्तटीयम् ।
दुर्दर्शाऽपि त्रिदशनिवहैर्लोकविश्रामभूमि-
र्मूर्तिः शश्वत्तिमिरशमनीवार्द्धनारीश्वरस्य ॥१३॥

कलभा सरसीरिहागता कलभाः सध्वनिहंससारसाः ।
विकशन्ति मुदा मुहुर्वने विकसन्नीरजराजिराजिते ॥१४॥

---

१. °र्णाभिः ।
२. °श्येनी ।
३. पुरत° ।

जलजं नदीषु जलजन्तुधुतं मधुपोषितोऽमधुपोपगतम् ।
सुमनोवधूकुसुमनोदकरं सुरभीह भाति सुरभीति पयः ।।१५।।

उत्फेनस्फुटपयसः सुवर्णरूपाः श्यामाश्मक्षितिपतिता शितासिभासः ।
आलोलैरिह पवनैर्विधूयमाना निर्मोकाः खलभुजगश्रियं श्रयन्ते ।।१६।।

तरणिकिरणसङ्गव्यक्तविस्फार्यमाणा
स्फटिकशिखरलेखा दूरमभ्रंलिहैषा ।
सुरसरिदुरुधारां स्वर्णसारां पतन्ती-
मनुवदति पुरस्तादत्र भूमीधरेन्द्रे ।।१७।।

कुञ्जरापचितशल्लकीद्रुमं कुञ्जराञ्चितऽमधुव्रतव्रजम् ।
वासितानिलममुष्य काननं वासिताण्डजगणं विभासते ।।१८।।

दन्तान्तरादुभयतो दधदाशु निर्य-
द्दन्तायितं स्फटिकयष्टिसवर्णमम्भः ।
दन्तावलस्य परिलीनकरस्य कृत्स्ना-
मन्तर्दधाति सुषमामिह गण्डशैलः ।।१९।।

हरिन्मणिनिरन्तरप्रतिगलप्रभाडम्बर-
स्फुरत्किरणधोरणीमसृणमत्र पृथ्वीतलम् ।
अमूनि परितः स्फुरल्ललितशाद्वलीशङ्कया
श्रयन्त्यनुदिनं मुहुर्मृगकदम्बकानि द्रुतम् ।।२०।।

आबद्धशुद्धगजमौक्तिकभूषणाभि-
र्बाणासनस्फुरदनेकशिलीमुखाभिः ।
कात्यायनीभिरिव सङ्गर एष शैलः
सिंहोद्धताभिरभिधर्षरितो गुहाभिः ।।२१।।

धूमाकारामसितमणीनां दीप्तें-
मत्वा धारां धरणितलादुद्यन्तीम् ।
रोधः[1] प्रान्तादवनतमूर्द्धा शाखी
धत्ते तीव्रं तप इव शैलेन्द्रेऽस्मिन् ॥२२॥

पतन्महानीलशिलावलीनां पतन्महाराशिरिहागराजि ।
पतन्महारावमुपैति लक्ष्मीं पतन्महानीलशुकावलीनाम् ॥२३॥

मधुरञ्जितालिजलरुण्मधुरं विततं सरःस्विह जलं विततम् ।
सुरसङ्घसेवितमलं सुरसं ध्वनिलम्बिवंशवनसाध्वनिलम् ॥२४॥

अर्कांशुदीप्तरविकान्तनितान्ततुङ्ग-
राशिं निधाय चतसृष्वपि मंक्षु दिक्षु ।
अस्मिन् सहस्रकिरणाभिमुखं निदाघे
तीव्रं तपस्यति तपस्विगणोमुमुक्षुः ॥२५॥

कुरङ्गनाभीरतगन्धर्वर्द्धिनी
कुरङ्गनाभिः स्थगिता सुराकुला ।
स्वरागताभिस्थगितासुराकुला
स्वरागताभिः स्थगिता सुराकुला ॥२६॥

विशोभते कन्दलजालशालिनी वनावली गन्धभरावशालिनी ।
इह स्थलाम्भोजपरागपाटला पटूभवत्पुष्पपलाश[2]पाटला ॥२७॥
(युग्मम्)

आभाति फुल्लकुसुमस्तबकानुबन्धि-
गुञ्जद्‌द्विरेफकुलसङ्कुलिताभिरेषः ।

---

१. वप्र° ।
२. °पराग° ।

गन्धर्वगीतरजितोरुमृगावलीभि-
गन्धोद्धुराभिरभितो मधुमाधवीभिः ।।२८।।

रत्नप्रभाशबलिताम्बरवीयमाणः
श्रीचन्दनप्रसभसौरभवासिताङ्गः ।
अङ्काधिरूढवनराजिवधूपगूढः
कामीव भाति गिरिरेष विशेषकान्तः ।।२९।।

अभ्रच्छेदैश्छन्नत्यक्ता वारं वारं हैम्यास्तद्याः[1] ।
अस्मिन् दीप्तिः सौ (शौ?) रेरुस्त्रैर्व (र्ध) त्ते विद्युन्मालालक्ष्मीम् ।।३०।।

पवनविमर्दोच्छलितपरागा मधुकरवृन्दारवरमणीया ।
इह नवगन्धोद्धुरमकरन्दा स्फुरति वनीयं कुसुमविचित्रा ।।३१।।

उद्रश्मिकान्तकुरुविन्ददलावलीढः
कुञ्जान्तरे स्फटिकभित्त(त्ति) भरैरमुस्मिन् ।
बिभ्रन्मरन्दरजसोपरिपङ्कलेप-
मापाकपाक इव भाति दरीप्रदेशः ।।३२।।

कपोलकाषादभिषक्तमुच्चैस्तरौ महानागमदस्य गन्धम् ।
अस्मिन् स[2]माघ्राय रुषाऽभिषिक्तः समूलकाषङ्कषतीभराजः ।।३३।।

मणिकलापकदीधितिदीपिनीरगुरुचन्दनसौरभनिर्भराः ।
घनपयोधरसंवलितास्तटीर्दधदसौ वनिता इव दीप्यते ।।३४।।

---

१. °म्नस्तद्याः (?) ।
२. इहैनमा° ।

हरितालगैरिकवनी[1]रभितः शिखराणि बिभ्रति बृहन्ति दधत् ।
गिरिरेष भाति रमणीयतरः सुरसुभ्रुवां तिलकमण्डनभृत् ।।३५।।

इह यावकद्रवसवर्णरुचः किरणैर्गतेषु (पथि) संवलितैः ।
सुरयोषितां चरणयोररुणः प्रतिकर्म बिभ्रति महामणयः ।।३६।।

धुतचन्दनागुरुगभीरपरिमलकलापमन्थरः ।
वाति सकलकणबन्धुरिह स्मरबोधनो वनसदां समीरणः ।।३७।।

(सु) विरावविततं ततं सदवनं वनं कुसुममञ्जुलमिह ।
मनोधृतिकरं करञ्जनिविडं विडम्बितधवं धवन्ति मरुतः ।।३८।।

उच्चैरुच्चैः शिखरसमूहासङ्गी
सङ्गीतैः स्वर्युवतिजनानां हारी ।
हारीतौघैर्मरि(?) चलतां संसक्तैः
सक्तैश्चैण्यां स्फुरति गिरिः सारङ्गैः ।।३९।।

इहाभिषिक्तः सुरनिम्नगाझरैर्निरुध्य सञ्चारमसौ नभस्वताम् ।
भृगुस्तपस्यन्निव तीव्रमुच्चकैर्लोकानतिक्रामति भूरिरोचिषा ।।४०।।

इत्थं प्रदर्श्य नगभर्तुरमुष्य लक्ष्मीं
लक्ष्मीं दधान उरगेन्द्रवरावतारः ।
तारापतिद्युतिरसौ नयनाभिरामः
साधीयसः स्ववचसो विरराम रामः ।।४१।।

---

१. °खनी° ।

इति सुभगतां पश्यन्तोऽद्रेरमी हरिवल्लभाः
सह युवतिभिः[1] क्रीडां चक्रुर्यथासुखमभ्रमाः ।
जगुरपि जगद्योनेः कर्मप्रभूतमहोदयं
शुभकरमघक्षोभच्छाद[2]प्ररूढतनूरुहाः ॥४२॥

इति श्रीगोवर्द्धने महाकाव्ये श्रीमद्गुरुधरणीधरचरणाब्जमधुकर[3]श्रीजगन्नाथ-कवि (कृते) गोवर्द्धनवर्णननामा तुरीयः[4] सर्गः ॥

१. युवतिसहिताः ।
२. °च्छेदि° ।
३. °मधुप° ।
४. गोवर्द्धनवर्णनो नाम चतुर्थः ।

पञ्चमः सर्गः

विहितं निशम्य गिरियज्ञमथ परिषदि व्रजालयैः ।
पाणियुगलमभिपिष्य रुषा बलभिद् बलाहकबलं व्युदैक्षत ॥१॥

रिपुविप्लवाय गुरुरोषजवनपवनैरुदञ्चितः ।
वृत्रशमनजलधिं चलतामनयद् द्रुतं भ्रुकुटिवीचिडम्बरः ॥२॥

प्रकृतार्द्धनृत्यमलमास्त सपदि चकितोऽप्सरोगणः ।
नम्रवलितनयना मुनयो जयशब्दमूचुरवि[1]शङ्कया शनैः ॥३॥

विहितानतिं स्थितमवेक्ष्य चरणनिकटे कृताञ्जलिम् ।
रोषदहनघनधूमनिभं मघवानवोचदिति पुष्करं वचः ॥४॥

सुरनायकस्य मम पश्य समजनि कियानतिक्रमः ।
घोषवसतिभिरशङ्कितया भुजगैरिवोज्जितविषैर्गरुत्मतः ॥५॥

ननु गोधनैरतिसमृद्धिमभिययुरमी ममार्चनात् ।
द्वेषवलितमतयो मयि तें मदयन्ति कं न[2] खलु चञ्चलाःश्रियः ॥६॥

धरणीभरावतरणाय भुवमुप[3]गतो ममानुजः ।
विष्णुरहितमति मामथवा प्रतिलङ्घतेयमभिसंश्रितो व्रजः ॥७॥

---

१. °मभि° ।

२. कान्न ।

३. °मभि° ।

तदमून् वनौकस उपेत्य सुरभिगणमन्तदुर्दिनैः ।
ध्वंसमुचितमभिलम्भयतं[1] महदाक्रमः सपदि हन्ति सम्पदः ।।८।।

अहमाश्रितो द्विरदनाथमनुपदमुपैमि सत्वरः ।
क्षिप्रपवननिवहैरधुना त्वमपि प्रयाहि धुरि तूर्णमम्बुदैः ।।९।।

इति वासवस्य कुपितस्य वचनमवकर्ण्य पुष्करः ।
अन्तपवनपरिधूतवपुः प्रलयप्रवृत्त इव शैलमभ्ययात् ।।१०।।

परितस्तरे जलदजालमुपरि परितश्च मण्डलैः ।
भीमनिनदनिवहैरनिशं जनयन् मयूररवरावितां महीम् ।।११।।

परितर्ज्जयन्निव करालमचिररुचिहस्तविभ्रमैः ।
अभ्रनिवह उदतिष्ठि(ष्ठि)पत (?)कुपिताकभ्रुकुटिभीषणं धनुः ।।१२।।

इति मेघमण्डलमुदीक्ष्य शिखरिशिखरादवातरन् ।
गोपसमितय उदूढभयं चलचेतसश्च सहगोभिरास्थिताः ।।१३।।

निबिडान्धकारहृतमूर्ति वपुरविभृतां च रोदसी ।
धूमपटलपरिधूतमिव क्षुभितावलोकमचिरांशुविभ्रमैः ।।१४।।

परिवर्तयन्निव ररास वियति विधुतो घनाम्बुधिः ।
उद्यदचिररुचिकल्पशिखिस्फुरितोरुहेतिनिवहैर्भयङ्करः ।।१५।।

मथिता नु सा[नु] ववनवीथिपरुषपरुषाः सशर्कराः ।
शीर्णशिखरिशिखराः प्रसभस्वनमाकुलाकुलमवुः प्रभञ्जनाः ।।१६।।

---

१. °लङ्घयतं ।

ववृषुर्बलाहककवलानि (नभसि) मुसलस्थवीयसीः ।
वज्रपञ्जरसितैरिव तं स्फुटयन्ति शैलमनुबन्धिनीरपः ।।१७।।

अधिवृष्टि (सृष्टि) निहितानि सपदि सुरभीकुलान्यलम् ।
भुग्नवदनमस (हा)नि भृशं प्रचकम्पिरे शिशिरवातशातनैः ।।१८।।

जननी यदन्तरविलीनशिथिलतरमूर्द्धवत्सकम् ।
स्तन्यविघटितरुचि प्रसभं विजहावसूननिलझम्पकम्पितम् ।।१९।।

शकटान्तरेषु तरुणीभिरतिभयनिमीलितेक्षणम् ।
कण्ठविषयमभिसस्वजिरे हृदयेश्वरा हृदयवेपथूत्तरम् ।।२०।।

गुरुसाध्वसक्षुभितकण्ठविगलदविभाविताक्षरम् ।
हूततनुजतरुणीसुहृदां स्तनितैः प्यधायिषत गोदुहां रवाः ।।२१।।

विधुरीभवन्तमिति वीक्ष्य निजजनमनुक्षणं हरिः ।
गर्वमतुलमवतारयितुं शतयज्वनः सपदि यत्नमाविशत् ।।२२।।

अथ लीलया करतलेन कमलमुकुलम्रदीयसा ।
आशु समुदहृत लोकगतिर्जगतीधरं तमिव कन्दुकं शिशुः ।।२३।।

भुजगेशमूर्द्धमणिजालकिरणपटलानि सर्वतः ।
अन्धतमसमभितः प्रसभं कुहरेऽस्य सक्तमुपनिन्युरुच्चकैः ।।२४।।

विवरान्तसक्ततनवोऽद्धमवनितलमद्धमास्थिताः ।
मूलविततय इवास्य गिरश्चकासिषुर्विपुलमूर्तयोऽहयः ।।२५।।

मधुघातिना विघटितस्य धरणितलतो धराभृतः ।
पूर्णजलधिनिनदानि भृशं शिखराणि तूर्णमभिसञ्जुघूर्णिरे ।।२६।।

फा० ४

करसङ्गमेन यदुभर्तुरुपचितगुरुप्रमोदभृत् ।
हृष्टतनुरुह इवातिबभौ धरणीधरः सविकचोरुभूरुहः ।।२७।।

अवदत् स गोपगणमाशु सरसहृदयोऽनुकम्पया ।
पाणिनखरशिखरे शिखरिप्रवरं प्रसूनमिव बिभ्रदभ्रमः ।।२८।।

सह्गोधनास्त्वरितमत्र विशत विवरे व्रजौकसः ।
गर्भभयमिव मम स्मरणं शमयिष्यतीन्द्रभयमेष वो गिरिः ।।२९।।

इति भारतीं समवकर्ण्य वनवसतयः सगोगणाः ।
आशु वि [वि] शुरगराजबिलं भवविप्लुता इव हरेः परं पदम् ।।३०।।

धरणीभृतोऽविरतधारमुपरि ववृषे घनाघनैः ।
जन्मविपदमथ भागवतं व्रजम [स्पृ] शन्नथ न वारिविप्रुषः ।।३१।।

भुजदण्डमास्थितममुष्य धरणिधरघर्मवारणम् ।
वृष्टिविपदमिव मोहधियं तिरयाञ्चकार परमार्थदर्शनम् ।।३२।।

विहगैरवाङ्मुखमपाति विगलदसुभिः सहस्रशः ।
रोषमगमि मृगराजकुलं रसितैरनुक्षणमुपोढसम्भ्रमैः ।।३३।।

सरितः समैधिषत भूमिरभवदतुलैर् [जलैः] प्लुता ।
कष्टमनिशममराधिपतिस्तनुते स्म वृष्टिमिति सप्त वासरान् ।।३४।।

वितथं समीक्ष्य निजवर्षमुपरतमदः शतक्रतुः ।
क्षीणतिमिरपटलः शुशुभे स्फुरितप्रसाद इव यामिनीक्षयः ।।३५।।

गलितें व्यलोकयदुदूढदुरित इव गाढदुर्दिने ।
गोपसमितिरभिगम्य बहिर्निजभाग्यराशिमिव भास्करोदयम् ।।३६।।

शनकैर्भुजामवनमय्य   सपदि   धरणावधिष्ठिपत् ।
भारशिथिलितफणीन्द्रफणैर्विधृतं   कथञ्चिदचलेशमच्युतः ।।३७।।

यूथानि   वत्सवयसामपि   शृङ्गिणीनां
शृङ्गाणि सद्रुमलतानि गतानि नाशम् ।
दृष्टयाऽमृतस्य परितः कृतयेव वृष्टया
सञ्जीवितानि   विदधे   सविधिर्विधीनाम् ।।३८।।

इत्थं गोपान् जलदविपदस्तूर्णमुत्तीर्य धीरो
गोपालत्वं स्फुटमिव दधद् योगयुक्तं शुभश्रीः ।
प्रेम्णा गोपैर्विहितनतिभिः स्तूयमानप्रभावः
स्मेरव्रीडानमितवदनो बालवज्जोषमासीत् ।।३९।।

इति श्रीगोवर्द्धने महाकाव्ये शुभाङ्के श्रीमद्गुरुधरणीधरचरणाब्जभ्रमर[1]श्री जगन्नाथकविकृते शक्रपरिभवनामा[2] पञ्चमः सर्गः ।

---

१. °मधुप° ।
२. °परिभवो नाम ।

षष्ठः सर्गः

स्फुरितप्रभावमतिबालबलं जगदाश्रयं श्रितशिलाफलकम् ।
हृतमत्सरः कृतविनीतवपुर्मघवा जिधाय तमघौघभिदे ॥१॥

ददृशे सहस्रनयनेन हरिः स्मरसुन्दरः स्मितमनोज्ञमुखः ।
द्रुतमत्तकुञ्जरघटोऽपभयः प्रसरन्महा इव मृगेन्द्रशिशुः ॥२॥

ज्वलितैर्विमानपटलैः सहसा महसा महेन्द्रमनु यानजुषाम् ।
प्रचलैरिवोडुनिकरैर्द्युसदां सुरवर्त्म सङ्कटमभूदभितः ॥३॥

वदनैः स्फुरद्दशनदीधितिभिः किरणैश्च भूषणमणिप्रभवैः ।
खचितान्तरालमलमप्सरसां गगनं महोमयमिव व्यरुचत् ॥४॥

अथ वृष्टयः सुमनसामुपरि व्रजवल्लभस्य शिशुरूप[illegible]षः ।
विशदा दिवः (सुरतरुप्रभवाः) सुरनाथकीर्तय इवाभ्यपतन् ॥५॥

निचितं समीक्ष्य हरिधाम भयस्थगितैस्तदा तदनुयायिबलैः ।
अविभाव्य मारुतविलोलपटैः सहशालभञ्जिकमिवाभ्रमभूत् ॥६॥

पुरतः क्षितावुदयमानममुं विधुमेक्ष्य बोधितसुहृत्कुमुदम् ।
विनमत्सहस्रनयनाम्बुरुहः स ललज्ज शक्रजलधिः प्रसभम् ॥७॥

द्विरदं विदूरमपहाय हरिं प्रणनाम दण्डवदखण्डरुचिम् ।
भयकम्पिताञ्जलिपुटं महसा शतमन्युरन्य इव धूतमहाः ॥८॥

अमुमस्तवीच्च जगदादिभवं भयगदाक्षरनि (बन्धमिति) ।
जयशब्दपूर्वमपराधहृतौ प्रथितः प्रभुर्हि विनतार्तिहरः ।।९।।

जनये रजोमयमजं जगतः स्थितयेऽस्य सत्त्वमथ विष्णुमयम् ।
हृतये तमोमयमुशन्ति हरं निजयेच्छया त्रिविधमेकमपि ।।१०।।

अपि ते निरञ्जनमजाञ्जनभं गुणदीर्घमप्यगुणवृत्तिपरम् ।
भवबीजमप्यभवबीजमलं प्रदिशन्ति रूपमिति वेदगिरः ।।११।।

पृथिवी जलं परमधाम मरुद् गगनं गुणास्त्वदिति भूतमयम् ।
उदितं समस्तमपि चास्तमितं त्वदृते न किञ्चिदखिलेश नमः ।।१२।।

भ्रमतः सहस्त्रनयनान्धतया भगवन्तमाकलयो मनुजम् ।
मदमार्ज्जनाञ्जनमलम्भि यतः परमार्थतस्तु तदनुग्रहणम् ।।१३।।

प्रभवन्नतिक्रमभवाधिकरं शमयेर्गवामिव ममापि भयम् ।
विमलो हि तत्त्वमयबोधमयः क्व भवानहं मदमूढमतिः ।।१४।।

उदयं लयश्च ननु मत्सदृशा इह बुद्बुदा इव जले जिहते ।
भगवान् महोदधिरिवावसिति सम्पैति नैव परमार्थतया ।।१५।।

विकृतिव्रजैः खलु न विक्रियसे तमसो गुणैश्च न हि संस्क्रियसे ।
रजसां चयैरपि च लोहमलैः प्रतिबिम्ब ईशमुकुरस्य इव ।।१६।।

तमभिष्टुवन्तमिति वीक्ष्य पुरः प्रणमन्तमाकुलमपि प्रसभम् ।
निजभक्तवत्सलतया विदितः परिषस्वजे हरिरुदारमनाः ।।१७।।

मघवाज्ञया कनकभक्तिमयैर्ज्वलितेव रत्नभवनैरभितः ।
भुवमाश्रिता सपदि दिव्यसभा शतयोजनायतवपुः शुशुभे ।।१८।।

अथ तावभिन्नवपुषावमरौ कनकासनं युगपदाश्रयताम् ।
परिकीर्णशीर्णसलिलप्रसरौ कनकाद्रिशृङ्गमिव वारिधरौ ॥१९॥

सपदि प्रसाद्य जगदादिगुरुर्विबुधैः समं कृतजयध्वनिभिः ।
विबुधेश्वरेण विहिताञ्जलिना पुनरभ्यधायि वचनं स इति ॥२०॥

अभिधां गवादिमथ विन्द इति समुपेयुषस्तव गवामवनात् ।
अनुभूय दिव्यमभिषेकममुं प्रथिमानमेतु भुवनेषु यशः ॥२१॥

अभिधाय वाचमिति दिव्यघटा.............................. ।
भगवानथासनगतः सुमना जगृहेऽभिषेकमधिराज्यमिव ॥२२॥

वदनान्यवाञ्चि दधतो गगने कलशा इवाम्बुनिधयः सलिलैः ।
स्नपयाम्बभूवुरधिगन्धभृतस्तमनन्तमद्रिमिव वारिमुचः ॥२३॥

चतुराननैः प्रथममब्जभवः पुलहादिकांस्तदनु मन्त्रगणान् ।
पृथुमङ्गले त्रिजगतां प्रथमे समधीयते स्म ऋषयोऽभिषवे ॥२४॥

पठतामुदारमभिषेकपदान्युदयं दिशन्ति किल मन्त्रकृताम् ।
प्रतिशाखमुच्चतरघोषचयो दिवमस्पृशत् सुरजयध्वनिभिः ॥२५॥

कलशाभिषेचनकृतावभृथं गिरियज्ञदीक्षितममुं परितः ।
जलविप्रुषः शममघं जगतां (?) शतशः स्फुरन्त्य उपनिन्युरलम् ॥२६॥

त्रिदिवेशतुङ्गवलभीर्दधतः प्रतिशब्दसङ्गमुखराः परितः ।
परमेष्ठिधिष्ण्यमपि मेघरवाः समदिध्वनन्नमरदुन्दुभयः ॥२७॥

समवाद्यताद्य महवाद्यघटा भुवि वादकैश्च घनघर्घरिता ।
ननृतुश्च नर्तकगणाः सलयं परमोत्सवैः पुलकिताङ्गलताः ॥२८॥

गलतीरमंसत न पट्टपटीः स्तनसङ्गिनीश्च पृथुहारलताः ।
तरुणीगणाः क्षणमपादधतस्तरुणैर्मदादिव महादवशैः ॥२९॥

हरितः प्रसेदुरिह कृष्णमहे सरितश्च फुल्लकमलाः परितः ।
ववृषुः प्रसूनचयमम्बुमुचः स्वयमज्ज्वलन् हुतभुजः कृतिनाम् ॥३०॥

विबुधैः समेत्य सुरनाथकृतं कलशाभिषेकमधिगम्य महः ।
जगतामधीशितुरमुष्य हरेर्विपुलामिरम्मद इवाप रुचिम् ॥३१॥

प्रभया ज्वलद्विविधरत्नभुवा मुकुटं हिरण्मयमुदग्रमथो ।
शिरसा दधत् स हरिसङ्गमितं विरराज विन्ध्य इव तिग्मरुचिम् ॥३२॥

मणिकुण्डले समकरद्युतिनी अरुणच्छविच्छुरितगण्डयुगे ।
युगसन्ध्ययोरुदयमेकपदे दधदुष्णवासर इवोदलसत् ॥३३॥

समदीपि हारलतया हृदये प्रतिसंश्रितेऽविरतमिन्दिरया ।
सुरभूर्वलक्षगुणसङ्गतया स समज्ञयेव विजितस्य हरेः ॥३४॥

कटकद्वयेन कुरुविन्दयुजा भुजयोर्महारजतजेन युगम् ।
बहिरुद्गतेन परिपूर्य तनुं निजतेजसेव समदीपि विभोः ॥३५॥

घुसृणावसिक्त हरिचन्दनजं दधदङ्गरागमरुगन्धमसौ ।
यमुनाप्रवाह इव संशुशुभे कमलव्रजोदितरजोऽरुणितः ॥३६॥

दहनोज्ज्वलत्कनकपिङ्गरुचिस्फुरितं दुकूलयुगमुद्वहता ।
परिदिद्युते सपदि तेन समं प्रभुणा क्षणद्युतिभृताम्बुभृता ॥३७॥

मणिचक्रवालरुचिविस्फुरितं प्रसभोज्ज्वलत्कनकभक्तिमयम् ।
कलकिङ्किणीकलकलैः कलितं प्रबबन्ध चारुकटिसूत्रमसौ ॥३८॥

तिलकं त्रिलोकतिलकस्यहरेरधि भालमालिखितमालसतम् ।
अधिलोकसम्पदनुबन्धकरं जयदस्य मूर्तमिव भाग्यपदम् ।।३९।।

मणिदर्पणे हिमरुचीव शुचौ निजमण्डनश्रियमतिद्युसदम् ।
परिसिस्मिये स परिवीक्ष्य विभुर्जगदाश्रयस्य खलु चित्रमदः ।।४०।।

समवाप्य सम्प्रति महेन्द्रकृतां प्रतिपत्तिमित्यभिबवावसितौ ।
स उपेन्द्र उल्लसितदिव्यवपू रुरुचे रुचा शुचिमिवोष्णरुचिः ।।४१।।

अधिशय्य तामथ महेन्द्रसभां स महार्हमासनमधिष्ठितवान् ।
मणिभित्तिषु स्फुरितबिम्बवशादभि विश्वरूपमिव संविविदे ।।४२।।

अभितो जयन्त उरुहर्षवशात् त्रिदिवेश्वरश्च(?)जयपूर्वममुम् ।
उरुचामरे कमलकन्दरुची कुसुमायुधच्छविमुदक्षिपताम् ।।४३।।

कमलासनप्रभृतयस्त्रिदशास्तमभिप्रणेमुरखिलेशमथो ।
मुकुटोपलद्युतिभिरास्तरणैः परिसंस्कृतामिव महीं दधतः ।।४४।।

अथ सात्त्विकं तदनु वार्चानिकं दधुराङ्गिकञ्च सरसाभिनयम् ।
क्षणमुर्वशीप्रभृतयोऽप्सरसः स्मरविक्रियां प्रकटयन्त्य इति ।।४५।।

लिखितेव काचिदवशा विबभौ सरसाङ्गयष्टिरितरा तरुणी ।
पुलकैः कदम्बलतिकेव परा प्रकृतार्द्धगीतिरितरा व्यरमत् ।।४६।।

पृथुवेपथुर्हिमयुतेव परा शुशुभे परा शशिकलेव दिवा ।
अभिखण्डितेव रुरुदेऽथ परा चकितालि कापि विमुमोह तनुः ।।४७।।

इति रामणीयकगुणेन विभुः सुरसुभ्रुवामहरत प्रकरम् ।
उदितः कलाभिरिव षोडशभिर्विमलश्चकोरचयमृक्षपतिः ।।४८।।

इति लोकविस्मयकरं सुतरां प्रकटय्य वैभवमनन्यभवम् ।
अनुजज्ञिवान् निजपदाय हरिं करुणार्द्रमूर्तिरभवत्सुमनाः ॥४९॥

अथ सुरपतिर्गोपानुच्चैर्महार्हपरिच्छदैः
सपदि विविधैः सम्पूज्यैतानुपोढमहोत्सवान् ।
सह सुरगणैः प्रेमोत्फुल्लैः प्रणम्य च तं मुहु-
र्मुदितहृदयः श्रीमानायान्निजं पदमुच्चकैः ॥५०॥

आनन्दफुल्लनयनैः स समेत्य गोपैर्गोविन्द इत्यभिधया परिवर्द्धितश्रीः ।
नीराजनाभिरपि घोषवधूजनानां विद्युद्भिरम्बुद इवातिशयं विरेजे ॥५१॥

श्रीमान् सपर्यामिति संविधाय गोवर्द्धनाद्रेः शुभकीर्तिनोऽसौ ।
सार्द्धं व्रजेन व्रजपालवर्यो व्रजं प्रतीयाय पुनः प्रतीतः ॥५२॥

इति श्रीगोवर्द्धने महाकाव्ये शुभाङ्के श्रीमद्गुरुधरणीधरचरणाम्बुजमकरन्द-रसिकश्रीजगन्नाथकविकृते गोविन्दाभिषेकोत्सवनामा षष्ठः सर्गः ॥ शुभं भूयात् ।

———

शोधशोभाशतकम्

●●

रचयिता

डॉ० शिवदत्त शर्मा चतुर्वेदः
काशीस्थहिन्दूविश्वविद्यालये
संस्कृतविद्या-धर्मविज्ञान-संकायान्तर्वर्तिसाहित्यविभागे
प्रवाचकः

★

गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः

Reprinted from Vol. 41 of the Journal of
Ganganath Jha Kendriya Sanskrit Vidyapeeth
Allahabad

शोधशोभाशतकम्

परमनिगूढं तत्त्वं स्पष्टं कुरुते परैर्यत्नैः ।
कालात् पुरातनादेवाऽऽचार्यैरादृतः शोधः ॥१॥

टीकाभाष्यविरचनेष्वाचार्यैर्यः समादृतः पूर्वम् ।
शब्देष्वर्थेष्वपि वा सर्वैरावश्यकः शोधः ॥२॥

वाग्व्यवहारवशीकृतलोकत्रयसंविधानानाम् ।
कविवर्याणां रचनावलिमध्ये दीप्यते शोधः ॥३॥

मलिनेऽस्मिन् परिवेशे निस्तेजं जायते ज्योतिः ।
मालिन्यमपाकर्तुं विज्ञैराराध्यते शोधः ॥४॥

वैज्ञानिकविद्यानां यन्त्राधारे प्रवर्तमानानाम् ।
नाना-पदार्थ-रचना-रहस्यमुद्भावयति शोधः ॥५॥

अनुभवसंवलितानां शुभ्रसफलताविवरणानाम् ।
मार्गोद्घाटननिपुणो विश्वेऽस्मिन् राजते शोधः ॥६॥

विस्मारयति नितान्तं परिवेशं सेवमानोऽसौ ।
जीवन-नव-साफल्यं करतलगतमादिशति शोधः ॥७॥

Reprinted from Vol. 41 of the Journal of
Ganganath Jha Kendriya Sanskrit Vidyapeeth
Allahabad

शोधशोभाशतकम्

परमनिगूढं तत्त्वं स्पष्टं कुरुते परैर्यत्नैः ।
कालात् पुरातनाद्वाऽचार्यैराहृतः शोधः ॥१॥

टीकाभाष्यविरचनेष्वाचार्यैर्यः समादृतः पूर्वम् ।
शब्देष्वर्थेष्वपि वा सर्वैरावश्यकः शोधः ॥२॥

वाग्व्यवहारवशीकृतलोकत्रयसंविधानानाम् ।
कविवर्याणां रचनावलिमध्ये दीप्यते शोधः ॥३॥

मलिनेऽस्मिन् परिवेशे निस्तेजं जायते ज्योतिः ।
मालिन्यमपाकर्तुं विज्ञैराराध्यते शोधः ॥४॥

वैज्ञानिकविद्यानां यन्त्राधारे प्रवर्तमानानाम् ।
नाना-पदार्थ-रचना-रहस्यमुद्भावयति शोधः ॥५॥

अनुभवसंवलितानां शुभ्रसफलताविवरणानाम् ।
मार्गोद्घाटननिपुणो विश्वस्मिन् राजते शोधः ॥६॥

विस्मारयति नितान्तं परिवेशं सेवमानोऽसौ ।
जीवन-नव-साफल्यं करतलगतमादिशति शोधः ॥७॥

मानवसमाजमध्ये विद्यन्ते ये चमत्काराः ।
सर्वेषामपि तेषां नूनं निष्पादकः शोधः ॥८॥

कालान्धकारपटलीतिरोहितं यद् विनिर्मलं सत्यम् ।
तत्रापीङ्गितकरणे सामर्थ्यं धारयति शोधः ॥९॥

लघुतममपि वा विषयं क्रोडीकृत्य प्रवर्तमानोऽसौ ।
सुरसामुखस्थमारुतिसादृश्यं धारयति शोधः ॥१०॥

शल्यक्रियासु निपुणो द्राक्कर इव छेदयति सर्वम् ।
सर्वं पृथक् पृथक् संस्कुरुते सम्यक् प्रभावितः शोधः ॥११॥

कारणशून्यानां यो विश्वासानां विलोपको नितराम् ।
आन्ध्यावृतं समाजं प्रकाशपुञ्जं निदेशयति शोधः ॥१२॥

अद्यावधि यदकाट्यं यं प्रतिष्ठितं सिद्धवद् बुद्धौ ।
छेदयते तत्सर्वं सन्देहोद्भावकः शोधः ॥१३॥

यः स्वीकृतैः प्रमाणैः परतन्त्रश्चिरनवीनत्वम् ।
प्राचामाचामयते कायाकल्प-प्रवर्तकः शोधः ॥१४॥

समुपेक्षितागर्ते निपतितमपि यः पदार्थजातं तम् ।
अहमहमिकया दृश्यं संग्राह्यं चादिशति शोधः ॥१५॥

प्रतिभाप्रकर्षलसितो नाना संसाधनैर्दीप्तः ।
विज्ञसमाजसमर्पितसंचारो दीप्यते शोधः ॥१६॥

संपूर्णं जीवनमपि यो लघुतमतां समानयति ।
शेषयति कर्म निखिलं पर्यन्ते वीक्षितः शोधः ॥१७॥

नैवादिर्नैवाऽन्तो नो वा मध्योऽस्य निगदितुं शक्यः ।
सर्वानपि सिद्धान्तान् पूर्वे पक्षे विधारयति शोधः ॥१८॥

सर्वेषां विषयाणां सर्वेषां वा पदार्थानाम् ।
क्रोडीकरणसमर्थः शोध्यं सर्वं समादिशति शोधः ॥१९॥

ग्रन्थेषु बृहत्कायेष्वथ लघुकायेषु लेखेषु ।
परिचर्चासु च पत्रेष्वलं विकासं गतः शोधः ॥२०॥

स्नातकतासम्प्राप्तावप्यध्येतुं यदादरो जातः ।
नूनं तदैव लभ्यः सर्वोच्चोपाधिसंगतः शोधः ॥२१॥

पारे समुद्रमपि यः सम्प्रेषणदक्षतां भजते ।
सर्वविधं व्ययदानं समादिशति सत्वरं शोधः ॥२२॥

बह्वायासे जाते सर्वं व्यर्थं यदा भवति ।
जलताडनवन्निखिलं श्रमं सुदूरं क्षिपति शोधः ॥२३॥

चेतस्तोषकरीं यो विद्यां सर्वं समाह्वयते ।
विदुषश्चान्यानखिलान् प्रसादयति सात्विकः शोधः ॥२४॥

आयासेन सुबहुना स्तोकं फलमेव योऽर्पयते ।
अङ्गुलिगणनीयानां मननीयो राजसः शोधः ॥२५॥

वागाडम्बरपूर्णोऽत्यल्पो नैवाऽथ तोषितः स्वान्तः ।
तुन्दिलतायां हृष्टः स्वीकार्यस्तामसः शोधः ॥२६॥

विश्वस्मिन् शिक्षायै याः संस्थाः सन्ति सुप्रथिताः ।
तासां शिरोमणित्वे लसतितमां दीपितः शोधः ॥२७॥

ज्ञानप्रकाशपूर्णान् विदुषो भन्यांस्तु यः कुरुते ।
सर्वसमीहितचरणान् वैदुष्य-व्यापकः शोधः ॥२८॥

पूर्व-पुरुष-भणितीनां सारं तत्त्वं विबोधयते ।
पोषयति चान्य-निकषे निष्कर्षैर्भूषितः शोधः ॥२९॥

प्राचीनाक्षर-माला-जालावलि-मध्य-पतितोऽयम् ।
निष्कर्ष-लम्बायित-विलम्बमुपयाति किं शोधः ॥३०॥

एकाग्रामथ चेतो वृत्तिं योऽसौ समाधिपरिजुष्टाम् ।
प्रदद्यातीष्टफलाशा परिपूर्णां मानसे शोधः ॥३१॥

यस्मिन् यस्मिश्चेतसि स्वीयं स्थानं निभालयति ।
तदलौकिकत्व-भावे संप्रेषयते स्वयं शोधः ॥३२॥

ग्रन्थिविभेदनकुतुकी तर्कान्वितसत्प्रमाणपरिपूर्णः ।
विपरीत-तर्क-धर्षण-परिपुष्टो राजते शोधः ॥३३॥

विदुषामप्येकेषां कूपे मण्डूकतामथ ताम ।
सद्यो दूरीकुरुते तान् सर्वत्र प्रचालयन् शोधः ॥३४॥

अङ्गीकरोति किञ्चित् दूरीकुरुते तथा किञ्चित् ।
किञ्चित् किञ्चिच्चिन्वन् संपूर्णो जायते शोधः ॥३५॥

ये वा भाव-विचारा नव्या इति निश्चयो जातः ।
ते तस्मादपि पूर्वं प्रकटा इति दर्शयति शोधः ॥३६॥

नूतनतमकमनीये रूपे यस्तोषको भवति ।
पुष्ट-निदेशकदिष्टः स्वीयं लास्यं विलासयति शोधः ॥३७॥

नानाकार-विकार-प्रकार-संचार-माधुरीरम्यः ।
अल्पज्ञानपि विदुषः पूर्णप्रज्ञान सुघोषयति शोधः ॥३८॥

यो विज्ञानां व्यूहे तडिदिव रोमांचमातनुते ।
स्वल्पाक्षरैर्वचोभिस्तस्माद् रोमांचकः शोधः ॥३९॥

भूगर्भेऽयं गच्छति भूतं कालं परामृशति ।
भूतानामपि शुद्धिं करोति करुणामयः शोधः ॥४०॥

कीलयति सर्ववाचं वाक्कीलेषु प्रचारमायातः ।
विज्ञानपि मूर्छयते प्रत्यक्षैरागमैः शोधः ॥४१॥

राज्ञां पुरातनानां हर्म्याणां यः परीक्षणं कुरुते ।
शस्त्राणां पात्राणां वस्त्राणां वीक्षकः शोधः ॥४२॥

सर्वं यत्र स्पष्टं सुनिश्चिततत्त्वं मतं यत्र ।
सन्देहैर्मन्देहांस्तर्कांस्तत्र प्रवेशयति शोधः ॥४३॥

सर्वविधश्रमविवशैर्व्यापारैर्यो वशीकृतो विषयः ।
पौनःपुन्यभृशार्थं तत्राऽविर्भावयति शोधः ॥४४॥

सन्मस्तिष्कान्तर्गत-शिरावलीर्झंकृताः कुरुते ।
शयनासनादिलोपं सन्तनुते चिन्तितः शोधः ॥४५॥

शतशतपुस्तकमध्ये सततं दत्तावधानोऽयम् ।
ज्ञाननदीनवधाराप्रवर्तने संगतः शोधः ॥४६॥

नानाऽतानवितानैः समावृतो ज्ञानतन्तूनाम् ।
दृष्टिं कामपि शिष्टां विशिष्टरूपां प्रवर्तयति शोधः ॥४७॥

एकस्या अपि पंक्तेर्विवेचने सादरं लग्नः ।
वर्षाण्यतिवाहते काले कलनां करोत्यसौ शोधः ॥४८॥

सर्वां किल व्यवस्थामामूलाद् यः समापयते ।
नव्यां निजां व्यवस्थां विदधात्यायातितः शोधः ॥४९॥

सर्वं व्यवस्थितमिदं सर्वं सर्वत्र संपूर्णम् ।
सर्वात्सर्वसमुदये सर्वां दृष्टिं समर्पयति शोधः ॥५०॥

अपि वा सुदूर-देश-स्थितसामग्रीसमाकलने ।
धावति सादृश्ये वा संमतिमुद्रान्वितः शोधः ॥५१॥

यद् यद् विशृंखलं तत् सर्वं सशृंखलं कुरुते ।
एकस्मिन् सर्वेषां समन्वयं सन्दिशति शोधः ॥५२॥

सृष्टौ सर्वं भरितं नवता नास्तीह कुत्रापि ।
ज्ञाने लाभस्तेषां, तस्मिन्कार्ये रतः शोधः ॥५३॥

वाक्यानां शब्दानां मात्राणां मातृकाणाञ्च ।
वीथीषु विभ्रमेषु भ्रमणं कुरुते स्वयं शोधः ॥५४॥

त्रैमासिकार्ध-वार्षिक-वार्षिक-पत्राणि चालयते ।
अनियतकालानामपि पत्राणां सम्प्रवर्तकः शोधः ॥५५॥

शोधार्थि-छात्रनिवहैष्वासादितवैभवः सोयऽम् ।
तेषामथवा तासां वृत्तीनां वर्षकः शोधः ॥५६॥

हर्षादुच्छालयते क्षणमात्रेणैव मोहितांश्छात्रान् ।
पंजीयनविनिबद्धानद्यत्वे स्वीकृतः शोधः ॥५७॥
विश्व-विभिन्न-विभाग-व्यक्ति-व्यक्तिपृथग्भूतः ।
ऐश्यं तेषां तनुते विस्तारित वैभवः शोधः ॥५८॥

नमयति यो निजरूपे सर्वेषां मस्तकानि भूयांसि ।
सर्वेषां सन्देशान् संशृणुतेऽयं समादृतः शोधः ॥५९॥

आक्रामकरूपाणामपि नित्यं सर्जनं कुरुते ।
सर्वस्वार्जनमथवा केषांचित् कल्पयति शोधः ॥६०॥

सांसारिकभोगानामपि संयोगं समादिशति ।
सर्वाश्चर्यमयीमथमुद्रां तां तां दिशति शोधः ॥६१॥

सर्वं निभाल्यमानं यत्कृपया भाति विनिगूढम् ।
सर्वं रहस्यपूर्णं मत्वा संशोभते शोधः ॥६२॥

कस्या अपि वार्तायाः समुद्भवः कुत्र संजातः ।
सत्याऽस्ति काऽथ वार्ता सत्यं सर्वं विशोधयति शोधः ॥६३॥

नवनिर्माणे किं किं पुरातनं सत्यमायातम् ।
कस्मिन् रूपे प्रकटं तत्सर्वं शोधयति शोधः ॥६४॥

प्रकटे विरूपभावे सौन्दर्यं यो विलोकयति ।
सर्वं सुन्दररूपं नीरूपं वा समादिशति शोधः ॥६५॥

रम्याञ्चितसत्पीठे निर्देशकवर्यसंगतः सोऽयम् ।
विभुतामयतां स्वीयां वैभवयुक्तां विभावयति शोधः ॥६६॥

परिपठन मनन-चिन्तन-लेखन-रूपेषु संलग्नः ।
त्यक्तान्यसर्वविषयः परिपूर्णः शोभते शोधः ॥६७॥

आदौ सूक्ष्मः क्रमशो विपुले रूपे प्रकाशमायातः ।
पर्यन्ते पुनरपि तत् सूक्ष्मं रूपं प्रकाशयति शोधः ॥६८॥

नानापाण्डुलिपीनां परिग्रहे जागरूकोऽयम् ।
तासां छायाचित्राण्यद्यत्वे संश्रयति शोधः ॥६९॥

मायाविनां समस्तां मायां सद्यः समापयति ।
वागाडम्बरपूर्णां विज्ञैर्विज्ञापितः शोधः ॥७०॥

अङ्गीकृतविषयाणां यद् दारिद्र्यं समुल्लसति ।
पूर्वोत्तरपक्षाभ्यां तद्वै सर्वं विलोपयति शोधः ॥७१॥

पाण्डुलिपीनां प्रथने नानाविधपाठभेदे च ।
पूर्णप्रज्ञ पुरातनपुरुषाणां देशिकः शोधः ॥७२॥

योऽसौ श्रुतिस्मृतीनां नानाविधसत्पुराणानाम् ।
इतिहासानां निर्णयकरणेऽविचलो विलोक्यते शोधः ॥७३॥

हर्षाणां यो वर्षा इव कुरुते विज्ञवर्याणाम् ।
चेतस्सु सर्वसुषमासौभाग्यैः संभृतः शोधः ॥७४॥

संमति-विमति-विभागैर्निष्कर्षे भिन्नतां यातः ।
परिषत्प्रगुणितरूपे निष्कर्षं संप्रतीक्षते शोधः ॥७५॥

नानायन्त्रपरीक्षितवस्तूनां गुणगणनिकायाम् ।
नव्यानां वस्तूनां निर्माणेऽन्वातरत् शोधः ॥७६॥

सत्यान्वेषणकार्ये सर्वसमर्पितसुपरिवेशः ।
सन्देहं भ्रान्तिं वा मिथ्यात्वं वा विदूरयति शोधः ॥७७॥

सिद्धान्त-व्याख्यानैरेवाऽयं नास्ति संतुष्टः ।
पूर्णप्रमाणपुष्टैस्तैः संतुष्टो भवति शोधः ॥७८॥

मूर्तीनां पात्राणां धातूनां च प्रणालीनाम् ।
प्रोत्खनने मिलितानां सुस्वागतमादिशति शोधः ॥७९॥

भित्तीनां कासांचिद् केषांचिद् भित्तिचित्राणाम् ।
शस्त्राणां मुद्राणां परीक्षणे प्रोद्यतः शोधः ॥८०॥

व्यर्थं किमपि न मनुते बह्वल्पं सर्वमाद्रियते ।
कोणे प्रतिष्ठितं यत् तत् संमुखमाधरति शोधः ॥८१॥

अज्ञातालपज्ञातप्रथाप्रवाहे निपतितानाम् ।
रचयितॄणां विषये पूर्णं श्रममादिशति शोधः ॥८२॥

राज्ञां पुरातनानामितिवृत्तं यो निभालयते ।
सामाजिकसंरचनाविकासमालोचयति शोधः ॥८३॥

आपाततः सुमधुराकृतिभिर्नीराजमानानाम् ।
घटनानामपि मध्ये विषबीजं दर्शयति शोधः ॥८४॥

शतशतसंस्थामध्ये शुभ्रोदयवीक्षितस्वान्तः ।
नैकसहस्रजनानां वृत्तिं स्वेष्टां सुचालयति शोधः ॥८५॥

नानानवपत्राणां प्रकाशने शूरतां यातः ।
सम्पादनचातुर्यं नूतनमुद्भावयति शोधः ॥८६॥

नूतननियुक्तिकाले प्राध्यापकपदाभिलाषिवर्गस्य ।
स्वीयोपाध्यनिवार्यग्रहणेच्छां दर्शयति शोधः ॥८७॥

नानाविधाऽनिवार्यैर्नियमैर्नियमितशरीरोऽयम ।
नानादोषच्छिद्रानप्ययत्वे विधारयति शोधः ॥८८॥

नानाविधसंभावितविघ्नग्रहणे भुजागरूकाणाम् ।
शोधार्थिनां प्रतिष्ठामथ बुद्धिं लोपयति शोधः ॥८९॥

निर्देशकवर्याणां मानविवृद्धिं परां तनुते ।
केषांचित् पुनरेषामपमानान्यपि समीहते शोधः ॥९०॥

शोधे सर्वं शुद्धं यद्यन्निर्देशकेन संदिष्टम् ।
अस्वीकृते निबन्धे निर्देशकदैन्यमावहति शोधः ॥९१॥

संगोष्ठीवेलायां शोधार्थिनमर्थसद्व्ययं कर्तुम् ।
गोष्ठीनिविष्टसज्जनजलपानादीन्निदेशयति शोधः ॥९२॥

अन्यैर्लिखितं तदिदं चान्यैः संशोधितं सम्यक् ।
अतिरिक्तद्रव्यलाभे विदुषोऽपि प्रेरयति शोधः ॥९३॥

अस्तव्यस्तदशायां कैश्चित् संप्राप्यमाणोऽपि ।
केषांचित्तु परेषां परिनिष्ठितभक्तिमीक्षते शोधः ॥९४॥

यैरध्यापकवर्यैः पाठनकार्ये परिश्रमो विहितः ।
शोधेऽनादरयुक्तास्तदुन्नतिं रोधयति शोधः ॥९५॥

रूपाणां बाहुल्ये पुरातनानां नवीनत्वम् ।
स्फूर्तिप्रदत्वमेषां सम्पादयतीह सत्वरं शोधः ॥९६॥

भूयो नवप्रबन्धैः शोधोत्तरशोधमाभरितः ।
प्रतिशोधशोधपूर्णैर्निजसीमावर्धकः शोधः ॥९७॥

सर्वासां भाषाणां साहित्ये भाषमाणानाम् ।
नैकट्यं वर्धयितुं साहित्यं शोधयति शोधः ॥९८॥

केन्द्रीयात्प्रान्तीयात् शासनचक्रात् सुपुष्टिमायातः ।
पोषणमखिलं यच्छति शिष्येभ्यः स्वीकृतः शोधः ॥९९॥

प्राचीनां परिपाटीं नवनवरचनासु जागृतां कुर्वन् ।
सत्प्रेरणां प्रयच्छति निर्माणेऽङ्गीकृतः शोधः ॥१००॥

शोधशतकसम्पूजितविभवो नीराजमानोऽयम् ।
शिवदत्तेन कथंचिद् संवर्णित एव दृश्यते शोधः ॥१०१॥

युतकयाचनम्

(एकाङ्किरूपकम्)

●●

रचयिता

श्री हीरालाल पाण्डेयः

सहित्यविभागाध्यक्षः

श्री महानिर्वाणवेदविद्यालयः

दारागंज, प्रयागः

गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्, प्रयागः

Reprinted from Vol. 41 of the Journal of
Ganganath Jha Kendriya Sanskrit Vidyapeeth
Allahabad

विषमयं विषमं विषयान्वितम्,

युतकयाचनमित्यवधारयन् ।

भवति कोऽपि जनो विरतस्ततः,

कविरयं सफलो विगतश्रमः ॥

युतक-याचनम्

—: पात्राणि :—

सूत्रधारः	
मङ्गतरामः श्रेष्ठी	वरपिता
मीरा	वरमाता
आशिषकुमारः	वरः
कन्यापालः	कन्या-पिता
दैवज्ञः	
चिकित्सकः	

॥ युतक-याचनम् ॥

(एकाङ्किरूपकम्)

नान्दी—(समूहगीतिः)

गणानामधीशं गणेशं नमामः,

गणेशं गणेशं गणेशं भजामः ॥

गजास्योऽपि नूनं

सुमुखस्त्वमेव,

गजकर्णसंज्ञोऽपि,

हेरम्ब देवः

लम्बोदरं त्वाम्,

प्रथमं स्मरामः ॥गणेशम्०॥

भालेन्दुविन्दो,

विघ्नेशविघ्नान्,

संयम्य भगवन्,

पालय त्वमस्मान् ।

महादेवमान्यम्,

नियतं जपामः ॥गणेशम्० ॥

वेदेऽथ लोके.

महिमा त्वदीयः ।

प्राथम्यदाने
योगो यदीयः ।
सिद्धिप्रदम् त्वाम्,
सततं यजामः ।।गणेशम्० ।।

(नान्द्यन्ते प्रविशति सूत्रधारः)

सूत्रधारः—

रम्या रमा रामसमाश्रिता सा,
सिन्दूरपूरै रचितां सचित्राम् ।
सीमन्तसीमां नयनाभिरामाम्,
सन्धारयन्ती भवतान्मुदे वः ।।१।।

अपि च—

तपस्ययाऽहं निजजीवनाथम्,
प्राप्स्यामि नूनं नहि तात ! चिन्ता ।
त्वया विधेयेति वचो निशम्य,
प्रसन्नमूर्त्तिर्जयतात् पिता सः ।।२।।

अपि च—

मायामुदस्य निरवद्य विवेकदीप्त्या,
सानन्दमच्युतपदं नियतं तदाप्तम् ।
स्वात्मानमात्मविभवेन विभावयन्यो,
योगीति गीतचरितो जयतात्स एकः ।।३।।

सूत्रधारः—

अथ भवतां श्रीमतां मनोविनोदाय श्रीमहानिर्वाणवेदविद्यालयस्य, दारागंज—प्रयागस्य साहित्यविभागाध्यक्षैः श्री हीरालालपाण्डेय-महोदयैर्विरचितं युतक-याचनं नाम रूपकमभिनेयमिति समादिष्टोऽस्मि । तदेवं विज्ञापयामि :

(श्रुतिमभिनीय)

अये ! कुतश्चित् शब्द इव श्रूयते । तन्निरूपयामि तावत् ।

(निरूप्य)

आम्, ज्ञातम्—

श्रेष्ठी मङ्गतरामोऽसौ,
सस्नेहं मृदुलैः स्वरैः ।
तरुणं विनयाढ्यं तम्,
पुत्रं पृच्छति साम्प्रतम् ॥४॥

तत् साधयामि—

(निर्गच्छति)

(ततः प्रविशति श्रेष्ठी मङ्गतरामः)

मङ्गतरामः—वत्स ! वत्स !

(पुत्र आशिषकुमारः प्रविशति)

आशिषकुमारः—पितः ! किमस्ति ?

मङ्गतरामः—पुत्र ! इत आयाहि । किञ्चिन्मन्त्रयितव्यमस्ति ।

आशिषकुमारः—यथा देशः । (मनसि) मया सह किमस्ति मन्त्रयितव्यम् ?

मङ्गतरामः—सूक्तं केनचित्—प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत् । तदिदानीं मे वत्सः—तरुणः, सुशिक्षितः, स्नातकः । अथ च मन्त्रणायाः विषयोऽपि स एव ।

आशिषकुमारः—पितः ! समुपस्थितोऽहम् ।

(मङ्गतरामः पुत्रस्य हस्तं गृहीत्वा)

मङ्गतरामः—वत्स ! समुपविशावस्तावत् ।

(उभावुपविशतः)

आशिषकुमारः—(मनसि) अहो ! अद्य मम पिता वात्सल्यवासितमनाः नितरां स्नेहेन व्याहरति । तत् किमस्ति कारणमेतादृशस्य व्यवहारप्रदर्शनस्य । जीवने प्राथमिकोऽयं वात्सल्यलाभः ।

(प्रकाशम्)

पितः ! को नु खलु नियोगः ?

मङ्गतरामः—वत्स ! श्रूयताम्—अद्य तव मात्रा भृशं बोधितोऽस्मि । सा मामपृच्छत् यत् किं वधूमुखमनवलोक्यैव सा संसारात् प्रस्थिता भविष्यति ? ह्य एव दग्धमुखी सा प्रतिवेशिनीलवमातरं सव्यङ्ग्यमुक्तवती—'अरे ! सुदिष्टात् वधूमुखमवलोक्यते' । तन्नूनं महता पुण्येनैव तद्दिनं भवति ।

तद् वत्स ! प्रतिवेशिन्या कथितेन तव माता समधिकाधिमग्ना । सा मामकथयत्—

सशपथं पतिदेव मदर्थितम्,
श्रुतवता भवता न विधीयते ।
अचिरमेव तदा मम जीवितम्,
विरहितं भवतो भविता ध्रुवम् ॥५॥

आशिषकुमारः—(सलज्जः) भवतु, पितः ! तदत्र न किमपि स्वकीयं करणीयं पश्यामि । तत्साधयामि (यातुमिच्छति) ।

मङ्गतरामः—वत्स ! क्व गम्यते ? स्थितो भव ।

आशिषकुमारः—तथा (उपविशति) ।

मङ्गतरामः—वत्स ! समयस्ते परिणयस्य, तत् कामपि सुशीलां, सुरूपां, सुसम्पन्नां, कन्यां वामाङ्गीं विधातुं स्वीकृत्य यशोभाग्भव । पूरणीयः पित्रोर्मनोभिलाषः ।

आशिषकुमारः—पितः ! कि परिणयेन ? किन्न पश्यति भवान् प्रतिपलं प्रवर्धमानां जनसंख्याम् ?

मङ्गतरामः—वत्स नैवम् । अस्माकं समेषामात्मीयजनानां परमाह्लादाय कर्तव्योऽस्ति त्वया परिणयः । अपि च वत्स ! प्रवर्धमानया जनसंख्यया न दूरादपि कश्चन सम्बन्धोऽस्माकम् ।

आशिषकुमारः—पितः ! अहं तु परिवारकल्याणाय बद्धपरिकरोऽस्मि । मम देशः पूर्वमेव खाद्यावासादिसमस्यया खिन्नः । तन्नाहं स्वात्मजन्मभूमिं तत्समस्यया खेदयिष्ये ।

मङ्गतरामः—(सपरुषम्) वत्स ! तया समस्यया संख्यया वा नास्ति किञ्चिदपि प्रयोजनम् । देशचिन्ता नात्मचिन्तायाः श्रेष्ठा । स्ववंशविस्तार एव कर्तव्यः । तथा चोक्तम् —'उत्पादयेद्बहून् पुत्रानिति ।'

आशिषकुमारः—(मध्य एव) पितः ! अनेनैवादर्शवाक्यपालनसंकल्पेन देशे जनानां संख्या सप्ततिकोटितोप्यधिका । नूनं यथा सस्यमेधते जनः ।

मङ्गतरामः—वत्स ! किं कथयसि ? पश्य, तव परिणयेन विना तव पित्रोर्मनोरथः वन्ध्यभूतोऽस्ति । इदं गृहं शिशु-क्रीडया सुचिरात् वञ्चितमस्ति । समाजेऽवमानं भजामः ।

आशिषकुमारः—पितः ! देशस्य, समाजस्य, आत्मनः, भवतः, मातुः, सर्वस्यापि हितं सुविचार्य परिणयात् विरतोऽस्मि । किन्तु यदि गृहमिदं शिशुक्रीडया वञ्चितमिति खेदः, तदा प्रतिगृहं पार्श्वे एव शिशूनां समवायोऽस्ति आयासं विनैव भवद्गृहं शिशूद्यानं सम्पत्स्यते ।

मङ्गतरामः—(मनसि) भोः, कथमेनं प्रबोधयामि । जीवने न शाश्वतिकं तारुण्यम् । कौमारभावेन कैश्चिदपि तन्न

खेदनीयम् । (प्रकाशम्) वत्स ! किन्न स्मर्यते समावर्तनकालिकमनुशासनम् । यदुक्तम् प्रजातन्त्रं मा व्यवच्छेत्सीरिति ।

आशिषकुमारः—पितः ! तदर्थमेव कथ्यते—न चिन्तयितव्यं तत्र । यदि शिशवोऽपेक्षिताः, तदा देश एव सुलभाः सन्ति । यथाऽपेक्षितमानीय सुखमनुरज्यताम् न तदर्थं पुत्रस्य परिणयभरः वोढव्यः । विना श्रमं पितृमहत्त्वं सम्पद्यते । तच्छ्रमोऽपि नैव कार्यः । तारुण्यमपि चिरस्थायि ।

अन्यच्च, पितः ! अनुशासनिकं प्रजातन्त्रं परिणयेन विनैव पाल्यते नैव व्यवच्छिद्यते ।

मङ्गतरामः—(मनसि) भो, कीदृशोऽयं युगप्रभावः । मम पुत्रो मामेव शिक्षयति, (प्रकाशम्) कथं कथं पाल्यते ? तदपि वक्तव्यम् !

आशिषकुमारः—बाढम्, पितः ! श्रूयताम्, प्रजातन्त्रस्याभिप्रायः—प्रजायाः—तन्त्रम् । अत्र च तन्त्र शब्दः—शासनवाचकः—फलतः—प्रजातन्त्रं, प्रजाशासनम् । तच्च देशस्यास्य सौभाग्यात् स्वतन्त्रतया सहैव सदुपलब्धम् । तथा हि—प्रजा एव प्रशास्ति, प्रशास्यते च अतएव—

गणतन्त्रप्रधानेऽस्मिन्,
भारते, भारते शुभे ।
प्रजायत्तं विधानन्तत्,
दैवायत्तं यथा जगत् ॥६॥

मङ्गतरामः—(मनसि) अहह ! असौ मद्बालकः शिक्षितमूढः । तन्मूढस्तु सुखं बोध्यो भवति । किन्तु शिक्षितमूढो दुर्बोध्य एव । तत्कथमेनं प्रतिबोधयामि । (चिन्तयति)

(ततः प्रविशति सोपनेत्रः गृहीतपञ्चाङ्गः सोष्णीषो दैवज्ञः)

दैवज्ञः—ग्रहाणामावासो विततगगने केन विदितः

जनानां दिष्टेन प्रभवति च तेषां बहुफलम् ।

तदेवं ज्ञाता स्यात्तदपि बहुमानं भजतु माम्,

त्रिकालं प्रत्यक्षं भवति मम विद्या हि सफला ॥७॥

अपि च—

स्कन्धत्रयात्मकं शास्त्रं,

ज्यौतिषं समुपास्य वै ।

फलाफलविवेकेन,

मान्योऽहं विधि तल्लजः ॥८॥

अहो ! पर्यटन् श्रान्तोऽस्मि । तत् क्षणं विरम्य गन्तव्यम् । (उपविशति) मन्ये मद्दिष्टमद्य प्रतिकूलम् । प्रभातात् साम्प्रतं यावत् नोपलब्धः कोऽपि यजमानः । (पञ्चाङ्गमुद्घाटयति) अथवा मुहूर्तं श्रममपनोदयामि ।

(कञ्चुकपार्श्वं स्पृशन्) तमालपत्रकरण्डकं क्वास्ति ?

आम्, अत्रास्ति (निःसार्य) (आलस्येन सुधया तन्मृजति)

(ततः प्रविशति मङ्गतरामस्य पत्नी)

दैवज्ञः—(तां निपुणं दृष्ट्वा) मन्ये, काचिदियं सम्पन्ना तथापि खिन्ना स्त्री । तत्कथमेतां प्रलोभयामि ।

(विचिन्त्य) तदेवम् (करस्थं तमालपत्रमपरेण करेण ताडयति)

मीरा—(विलोक्य) अये ! विलक्षण एवाऽयं कश्चित् । भवतु न परपुरुषो विलोकयितव्यः । (शिरोऽवगुण्ठयति)

दैवज्ञः—देवि ! किञ्चित्प्रष्टव्यमस्ति सुदूरादागतोऽहं भवत्याः कौलीन्यं सम्यग् जानामि । सिद्धादेशिकोऽहम् । भवती मङ्गतरामस्य धर्मपत्नी कच्चित् ?

मीरा—(मनसि) अये ! कथमयं मां जानाति । नूनं विज्ञानसम्पन्नोऽयम् ।

दैवज्ञः—देवि ! कथयतु भवती । यावदहं वेद्मि तावत्तथैव दृढं कथयामि, तन्नैवाश्चर्यम् । दैवज्ञोऽहम् । त्रिकालं प्रत्यक्षं पश्यामि । इदानीं भवती पुत्रोद्वाहमिच्छन्ती नूनं सचिन्ता । श्रेष्ठी मङ्गतरामः पुत्रं परिणयार्थमेव प्रबोधयन्नस्ति ।

मीरा—(मनसि) अहो ! सत्यं, सर्वमेव साक्षात् पश्यति । तत्पुत्रमाह्वयामि । वत्स, वत्स ।

आशिषकुमारः—पितः ! माता मामाह्वयति । तच्छृणोमि तावत् । (मनसि) भवतु कथञ्चिन्मुक्तोऽहम् । (प्रकाशम्) मातः ! किमस्ति ?

(मातुः पार्श्वे गच्छति)

मङ्गतरामः—(सोद्विग्नः) किं कथयामि ! पूर्वन्तु पुत्रस्य परिणयवार्तायै मान्तथा प्रैरयत् । इदानीं यदा तदर्थमेव पुत्रमुपदिशान्नासम् तदा मध्य एव तमाह्वयत् । तत्किं करोमि । भवतु विश्राम्यामि । (तत्रैव शेते)

(पुत्रः आगत्य मातुश्चरणौ प्रणमति)

दैवज्ञः—(दृष्ट्वा) देवि ! नूनं भवती भाग्यवती यस्या एतादृशः सुदिष्टः पुत्रः ।

आशिषकुमारः—मातः ! किमस्ति को नु खलु एषः ।

मीरा—वत्स ! दैवज्ञोऽसौ विधात्रा भाले लिखितामक्षरमालिकां पठति । तद्दूरदेशात्समुपस्थितः किञ्चित् प्रष्टुकामोऽस्ति ।

आशिषकुमारः—महाशय ! कथयतु भवान् ? किमस्ति प्रष्टव्यम् ?

मीरा—(मनसि) वत्स, प्रष्टव्यं खलु मयाप्यस्ति । तत्कथं पृच्छामि (चिन्तयति) ।

दैवज्ञः—वत्स ! श्रूयताम् । तव पिता सम्प्रति तव परिणयार्थं सचिन्तः । तदर्थमेव त्वां प्रबोधयति स्म तत्किं सत्यम् ?

मीरा—(मनसि) मद्हृदयेन मन्त्रयते ।

आशिषकुमारः—भवतु, भवतु । तत्तु पारस्परिकं सम्भाषणं भवता श्रुतं स्यात् । (सक्रोधम्) भोः वैयक्तिकं तत्, तेन किं भवतः । मातः ! इतः सापयावः । व्यर्थमेव मुह्यति भवती ।

मीरा—वत्स ! सम्मान्योऽसौ महानुभावः नूनं पिता तव दैवज्ञ-ममुं साक्षात्कृत्य प्रसादमेष्यति ।

आशिषकुमारः—(परुषम्) मातः ! विंशतिशताब्द्या अन्तेऽपि पाषाण-युगीनो विचारो न मुञ्चति भवतीमिति मे विषादः । प्रच्छन्नेनानेन सर्वं श्रुतं स्यादावयोः सम्भाषणम् ।

मीरा—(मनसि) अभिनवशिक्षादिग्धोऽयं न श्रोष्यति । (प्रकाशम्) वत्स ! गच्छ त्वम् । पितरं प्रेषय ।

आशिषकुमारः—भवतु गच्छामि । (पितुः समीपमागत्य) पितः ! पितः ! अहो ! पिता तु सुखं शेते । तन्नैव प्रत्यवायो भवामि । तद्भ्रमणाय यामि ।

(निर्गच्छति)

मीरा—भगवन् ! दैवज्ञ !

संदिग्धबुद्धिः पुरुषो हि नूनम्,
नारीस्वभावं न समीक्ष्य वादी ।
एवं धिया साधुविचारदक्षाः,
परापवादाद् विरमन्ति नार्यः ॥६॥

तत्पतिदेवमेव पृच्छामि ! क्षणं पालयतु भवान्तदागमनम् ।

(पत्युः समीपमायाति)

दैवज्ञः—शुभमस्तु । जपामि तावद् भगवतीं कुलदेवताम् ।

मीरा—अये ! सुप्तोऽत्र भवान् ! तत्कथमेनं प्रबोधयामि । (चिन्तयति)

मङ्गतरामः—(उत्स्वप्नायते) आह ! किमुच्यते ? अहं युतकविरोधिमञ्चस्य महामन्त्री । मम पुत्रस्य विवाहे वराटिकाऽपि न लप्स्यते । तत्त्वं मूर्खः । लक्षमुद्राः ग्रहीष्ये । लक्षमुद्राः वैधेय ! आदानस्य नैकः प्रकारः । अरे ! अहं तु युतकयाचनस्य यो खलु समाजे प्रकारो विद्यते तस्यैव विरोधी ।

मीरा—(मनसि) अहो । स्वप्नेऽपि पुत्रस्य विवाहे लक्षमुद्रात्मकं युतकं पश्यति । तदर्थमेव चिरयति । साम्प्रतमवगतम् । तत्प्रबोधयाम्येनम् । अथवा कथं सुखं प्रबोध्योऽस्तु । (चिन्तयति) भवतु दृष्टम् । (वीणया सह गायति)

प्रमीले नयनशयनसङ्गिनि ॥

अनवद्यं तत्सुखसौविध्यम्,
सततं योगिजनैरथगम्यम् ।
निमीले ! निमिष पथविहङ्गिनि,
प्रमीले ! नयनशयनसङ्गिनि ॥

मङ्गतरामः—(उद्बुध्य) अहो गीतम् । भाग्यवति ! सुखं प्रबुद्धोऽस्मि ।

मीरा—शोभनम् ! कश्चन दैवज्ञः समुपस्थितोऽस्ति । तद्यदि रोचते भवते, तदा तमविलम्बितेन पश्यतु भवान् ।

मङ्गतरामः—बाढम् । सुदिष्टादेव दैवज्ञः समुपस्थितः । तत्क्वास्ते ? भाग्यवति ! पश्यतु भवती ।

परस्परं सौख्यविवर्धनेन,

दाम्पत्यमर्थं ससुखं भजावः।

मृषाविषादेन किमर्थमेवम्,

वामाङ्ग ! चन्द्रः स्रवदश्रुमग्नः ॥१०॥

मीरा— (प्रसन्नतां नाटयति)

ननु द्वारदेश एव सः।

मङ्गतरामः—भवतु। (गत्वा दैवज्ञं विलोक्य) दैवज्ञ ! प्रणमामि भवन्तम्।

दैवज्ञः—यजमान ! अर्थवान्भव।

मङ्गतरामः—भगवन् दैवज्ञ ! आगम्यताम्। इदमासनम्। आस्यताम्।

दैवज्ञः—एवम्, (उत्थाय तथा करोति)

यजमान ! नूनं सुदिष्टो भवान् !

मङ्गतरामः—(सलज्जः) दैवज्ञ ! भवान् त्रिकालद्रष्टा खलु। तद्भवतां प्रसाद एव।

दैवज्ञः—यजमान ! इह मत्समीप एव उपविशतु भवान्।

(मङ्गतरामः समीपस्थोपविशति)

दैवज्ञः—(मङ्गतरामस्य भालं निरूपयति) अहो ! भालरेखा भवतः कथयति यद् भवन्मनोगतं रहस्यं भवति। आयुष्यं तावत् पूर्णम्। अहो समाजसेवा भवतः कार्यक्षेत्रम् भविष्यति। भवतु, भवतु, हस्तं पश्यामि तावत्।

(मङ्गतरामो हस्तं प्रदर्शयति)

यजमान ! सद्रव्यं भवद्धस्तं दृष्ट्वा जानामि द्रव्यविषयको भवतः प्रश्नः ।

(मङ्गतराम अधोमुखस्तिष्ठति)

दैवज्ञः—यजमान ! तदेषा भाग्यरेखा प्रमाणयति यत् भवान् सत्यं भाग्यभाक् । हृदयरेखा भवन्तं गूढविचारसम्पन्नं प्रतिपादयति विवाहरेखा दाम्पत्यजीवने काञ्चिद् बाधां निरूपयति । भवननिर्माणयोगोप्यस्ति । अहो ! एषा रेखा तु विशिष्टैव । नूनं सुगुप्तं धनमचिरादेव दास्यति । (मीरा प्रविशति)

मीरा—अत्रैव स्थित्वा शृणोमि तावद् दैवज्ञविज्ञापितम् ।

दैवज्ञः—यजमान । मिलिष्यति भवच्चिन्तितं धनम् । किन्तु तद्विषये पत्न्यापि सार्धं न किञ्चित् कथनीयम् ।

मङ्गतरामः—(सोत्कः) दैवज्ञ । भवदादेशः सम्यक् पालयिष्यते । न पत्नीमपि किञ्चित् कथयिष्ये । किन्तु ज्ञातुमिच्छामि कदा तद्धनं प्राप्स्यते ? कथञ्च लप्स्यते ?

दैवज्ञः—भवतु । दिवा निरीक्ष्य वक्तव्यम् । मन्ये भवद्धर्मपत्नी दत्तावधाना समीपस्था सर्वं शृणोति । तत्कर्णे कथयामि ।

मङ्गतरामः—तथास्तु । (दैवज्ञः कर्णे जपति)

मङ्गतरामः—शोभनं, शोभनम् ।

दैवज्ञ ! तदा तु यावज्जीवनमहं भवतः कृतज्ञो भविष्यामि ।

मीराः—अहो ! अयं दैवज्ञः किमपि संगोप्य कथयति । तच्छ्रोतु-मह्मपि नाधिकारिणी ? तन्नूनं मम विषय एव

किञ्चिदमन्त्रितं भविष्यत्यनेन। भवतु नात्र स्थातुमुत्सहे।

दैवज्ञः—यजमान! साधयामि। समये यदा भवान् स्मरिष्यति तदा ध्रुवमागमिष्यामि।

मङ्गतरामः—दैवज्ञो गृह्यतां दक्षिणा।

(दैवज्ञो गृह्णाति)

अवशिष्टा दक्षिणा तदैव प्रदास्यते।

दैवज्ञः—यजमान!

उत्कोचं दक्षिणा चापि,

पारितोषिकसत्क्रिये।

तत्कालं लभतां लभ्यम्,

विलम्बे तद्विलम्बितम् ॥११॥

(निर्गच्छति)

तद् यथादिष्टं लब्धम्। यामि तावत्।

(ततः प्रविशति आशिषकुमारः)

मङ्गतरामः—वत्स! इदानीं मत्कार्यं लघुभूतम्। कश्चन दैवज्ञो मम भाग्यरेखां विचार्य समादिशत्।

आशिषकुमारः—(मनसि) अहो मौग्ध्यम्।

(प्रकाशम्) भवतु, पितः! नाहं दैवज्ञं विश्वसिमि।

मङ्गतरामः—भवतु! त्वम् तु सम्प्रति बालोऽसि। तद्गच्छ मातरं प्रेषय।

(मीरा प्रविशति)

मङ्गतरामः—भाग्यवति ! तव पुत्रस्य विवाहः सम्पन्न एव ।

मीरा—कथं कथं स्पष्टं कथनीयम् ।

मङ्गतरामः—शृणु, दैवज्ञः कमपि कन्यापालनामानं कन्यापितरमचिरमेव प्रेषयिष्यति ।

मीरा—अहो ! नूनं प्रसन्नताविषयोऽयमुदन्तः ।

मङ्गतरामः—भाग्यवति ! स्मर्यते निजोद्वाहः । तदा तु नासीदेतादृशी-महर्घता । किन्तु कृपणस्ते पिता''''न किञ्चिदपि ददौ ।

मीरा—भो ! मम पितरौ क्षिप्येते । तन्नाऽहं श्रोतुमुत्सहे । माम् प्रदाय ताभ्यां सर्वमेव दत्तम् । अथ कुतस्ते धनविषयको व्यामोहः ?

पश्य—

कन्यारत्नं महन्नूनम् ।

नो दुष्यं युतकाचनैः ।

दत्ता कन्या ध्रुवं येन,

नूनं सर्वं तदर्पितम् ॥१२॥

मङ्गतरामः—भाग्यवति ! एतदर्थमेव कथयामि यदज्ञा भवती।। विवाहे मूलस्थानीया रुढिः । सा च—

वित्तेहा सर्वथा कार्या,

पुत्रोद्वाहे विचक्षणैः ।

बिना वित्तं कुलीनत्वम्,

नैव कस्यापि विद्यते ॥१३॥

अपि च—

दरिद्रो धनिको नूनम्,
यस्य पार्श्वे सुतास्तथा ।
धनिकोऽपि दरिद्रः स्यात्
यो भवेत् कन्यका पिता ॥१४॥

तदहं पुत्रस्य पिता न खलु कन्यायाः ।

(नेपथ्ये)

भो ! पृच्छामि भवन्तम्, ननु मङ्गतरामस्य गृहमन्विषामि ।

मङ्गतरामः—भाग्यवति ! कोऽपि मां पृच्छति तत्पश्यामि (किञ्चिद्गत्वा समागतं पुरुषं पृच्छति) भो ! कथयतु भवान् ।

मीरा—मन्ये कन्यापाल एव समुपस्थितः स्यात् । तदाभ्यन्तरमेव गन्तव्यम् (गच्छति)

कन्यापालः—ननु भवान् श्रेष्ठी मङ्गतरामः कच्चित् !

मङ्गतरामः—आम्, आम्, अहमेव मङ्गतरामः, जनाः मामेव श्रेष्ठि-मङ्गतरामनाम्ना सम्बोधयन्ति ।

कन्यापालः—तत्प्रणमामि भवन्तम् । ननु कन्यापालोऽहम् ।

मङ्गतरामः—प्रति प्रणमामि भवन्तम् । आगम्यताम् अत्रास्यताम् ।

(उभावुपविशतः)

कन्यापालः—भगवन्, कुशलमनामयं च पृच्छामि ।

मङ्गतरामः—सर्वमेव भवत्कृपया शोभनमस्ति । विशेषतोऽद्य भवद्दर्शनेन ।

कन्यापालः—दैवज्ञेन विज्ञापितं यत्सम्बन्धाय भवदीयः पुत्रोऽनुकूलः, तदर्थमेव समुपस्थितोऽस्मि ।

मङ्गतरामः—कृपाऽस्ति । तद्भवद्भिरपि प्रथमं पुत्रो दृष्टः स्यात् । वत्स ! आगम्यताम् ।

(आशिषकुमारः प्रविशति)

आशिषकुमारः—पितः ! आगतोऽहम् ।

मङ्गतरामः—वत्स । अयं महानुभावस्त्वया प्रणम्य इति ।

आशिषकुमारः—प्रणमामि भवन्तम् ।

कन्यापालः—वत्स ! चिरञ्जीव !

(मनसि) सुन्दरः, सुशीलः, विनीतश्चायम् समानैवावस्था । तदुचित एव वरः ।

(प्रकाशम्) सम्बन्धिन् ! सन्तुष्टोऽस्मि ।

(पुत्रो निर्गच्छति)

मङ्गतरामः—शोभनं, शोभनमनुगृहीतोऽस्मि । तत्सम्प्रति दैवज्ञस्यैवागमनं परिपालनीयम् ।

(ततः प्रविशति दैवज्ञः)

दैवज्ञः—यजमान ! समुपस्थितोऽहम् ।

उभौ—दैवज्ञ ! प्रणमामि भवन्तम् ।

दैवज्ञः—यजमान ! वीतचिन्तो भव ।

अथ मन्ये सम्बन्धोऽभिमत एव भवतोः कन्यापुत्रयोः ।

उभौ—सम्बन्धस्तु सम्मत एव । केवलं भवतोऽत्र सम्मतिरभ्यर्थिताऽस्ति ।तदियं कुण्डली, ग्रहमेलनेन भवताऽनुमतिः प्रदत्ता स्यात् ।

(उभौ कुण्डलीं प्रयच्छतः)

दैवज्ञः—(एकामेकां कृत्वा पश्यति पुनः सम्मेल्य पश्यति) किं किं तदेवम्। यजमान ! वरकन्ययोः कुण्डल्यां ग्रहस्थितिः, ग्रहमैत्री, तारामैत्री, भकूटं, योनिकूटं, नाडी प्रभृति सर्वमेत्र शोभनम्। किन्तु…।

उभौ– यदि सर्वं सुष्ठु तदा किन्तु-परन्तु किमुच्यते ?

(मीरा प्रविशति)

मीरा—(मनसि) एकतः स्थित्वाश्रृणोमि विवाहविषयकोदन्तम्। तदत्र तिष्ठामि यतः कन्यापित्रा नाऽहं दृष्टा स्यामतोऽत्रैव स्थातव्यम्।

दैवज्ञः—श्रूयताम्—कन्यातावत्,

निकषकनकरेखा राजते सा सुकन्या,

शुभगुणगणसीमाचारुचन्द्राब्जकल्पा।

एवं वरोऽपि—

नयविनयविवेकैर्मण्डितो वै सुदक्षः,

परिणयपरिणेयः कन्यया ते वरोऽसौ ॥१५॥

तस्मात्– *सिद्धान्तं जातकञ्चैव,*

संहिताञ्च विचार्य भोः।

प्रदिशामि विवाहेस्मिन्,

किन्तुर्निष्ठानुमन्यताम् ॥१६॥

कन्यापालः—(मनसि) किञ्चिदनिष्टमिव विवक्षति।

मङ्गतरामः—दैवज्ञ ! अस्पष्टं भवदीयं कथनमस्मान् व्यामोहयतीवास्ति । तत् स्पष्टं कथनीयम् ।

दैवज्ञः—का गतिः, भवतां सम्बन्धाय कथयाम्येव । तच्छ्रोतव्यं भवद्भिः—

कन्याकुण्डल्यां किन्तुनामा ग्रहोऽस्ति यच्छान्तिं विधायैव विवाहः कार्यः ।

कन्यापालः—ननु दैवज्ञ ! कोऽस्ति शान्तिप्रकारः ?

दैवज्ञः—श्रूयताम्—

किन्तुग्रहाणौ प्रथमोऽस्ति कल्पः,

संगोप्य नूनं वरतातहस्ते ।

त्वया प्रदेयाः खलु लक्षमुद्राः,

ततो विवाहो शिवदः कृतः स्यात् ॥१७॥

कन्यापालः—दैवज्ञ किं कथ्यते भवता । ग्रहास्तु नवैव । तदभिनवो ग्रहो भवद्भिः कुतोऽन्विष्टः ! अहं तु वरपितरं युतक-विरुद्धं मत्वा सम्बन्धाय समुपस्थितोऽभूवम् ।

दैवज्ञः—भो, नैतत् युतकम् । ग्रहशान्त्यै तद्देयम् । सद्य एव किन्तु-नामाग्रहोऽन्विष्टोऽभूत् । यदा विवाहानन्तरं वर्षाभ्यन्तरमेव पतिगृहे वधूनां मृत्युरग्निनाऽन्येन वा केनचिल्लघुकारणेन वर्धमानोऽभवत् । तदाऽहं कस्य ग्रहस्यायं परिणाम इति ग्रहान्वेषणे संलग्नोऽभवम् । एवं किन्तुनामाग्रहः अन्विष्टो-ऽभूत् । यजमान ! मम शोधपत्रं निरीक्ष्य ज्योतिर्विश्व-विद्यालयः ससम्मानं डी० लिटित्युपाधिना मां समभिनन्दितवान् ।

मङ्गतरामः—(मनसि) अहो ! महानयं दैवज्ञः सर्वोच्चशोधोपाधिना-ऽलङ्कृत आस्ते ।
(प्रकाशम्) यद्येवम् तदा वरकन्ययोः कल्याणाय लक्षमुद्राः ग्रहीष्ये ।

कन्यापालः—अहो ! विचित्रैव ग्रहः, ग्रहशान्तिप्रकारस्तु विचित्रतमः । (चिन्तयति) ।

मङ्गतरामः—सम्बन्धिन् ! अलं चिन्तितेन । पश्यतु भवान्—

ग्रहाणामायत्तं सकलमपि लोकस्य चरितम्,
ग्रहाधीना सृष्टिः स्थितिरपि तथा संहृतिरपि ।
ध्रुवं तद्दैवज्ञः पठति विधिलेखं बुधवरः,
विधानं तच्छान्त्यै दिशति यदि कार्यं लघु तथा ॥१८॥

कन्यापालः—(मनसि) भो, कुतः लक्षमुद्राः लप्स्यन्ते ? (प्रकाशम्)

सम्बन्धिन् ! योऽहम्—

कन्याधनैर्योऽस्मि कृतो विधात्रा,
धन्यास्पदानां परितर्पहेतुः ।
अद्यैव जाने वरलोकपक्षः,
वित्तेन नूनं परितर्पणीयः ॥१९॥

तत्साधयामि । कमपि भिन्नं दैवज्ञं पृच्छामि ।

(उत्थाय निर्गच्छति)

दैवज्ञः—यजमान ! अहमपि पश्यामि कोऽन्यो दैवज्ञो मम कथनं वितथं कथयति ।

(दैवज्ञोऽपि निर्गच्छति)

मङ्गतरामः—अहं तु दैवज्ञकथितपरिपालनाय स प्रतिज्ञातोऽस्मि। अहह, कन्यापालो गतः, तद्दैवज्ञोऽपि गतः। तत् कथं लक्षमुद्राः लप्स्यन्ते। आह ! किं करोमि ! हा लुण्ठितोऽस्मि। अये भाग्यवति ! कुत्रासि ! त्वरितमायाहि। पिपासाकुलोऽस्मि

मीरा—स्वामिन्, किमस्ति, किमर्थमुद्विग्नोऽस्ति भवान् ! इदानीं पुत्रस्य विवाहाय वार्तालापं कुर्वन्नासीत् तत्किं जातम्।

(प्रविश्य)

अहो ! किमस्ति, वदतु भवान् ! वत्स ! पश्य, कथं करोति तव पिता !

मङ्गतरामः—भाग्यवति ! लक्षशुचाविद्धोऽस्मि।

आशिषकुमारः—पितः ! धारयतु भवान्।

मीरा—वत्स ! चिकित्सक आनेतव्यः।

(प्रविश्य)

चिकित्सकः—नन्वहं चिकित्सकः,

(मङ्गतरामं सम्यक् परीक्षति)

ओम् ! मन्ये, शोकाविद्धोऽयम् ! किम् काचिद्मुद्रायाः चर्चा विघटिता किम् ? यतः परीक्षणेन ज्ञायते धनविषयकहृदय-क्लेशेन पीडितोऽयम्।

मीरा—अस्ति खल्वेवमपि। पुत्रस्य विवाहप्रसङ्गे लक्षमुद्रायाः चर्चाऽस्माभिः श्रुता। मन्ये मुद्रानिमित्तादेव सम्बन्धो भग्नः कन्यापालनामा कन्यापितागतः।

मङ्गतरामः—(श्रुतिं निरूपयन्) भाग्यवति !

किं कथयसि—कन्यापिता आगत इति तन्नूनं दैवज्ञाऽनुमतं लक्षं लप्स्यते ।

चिकित्सकः—भवतु, भवतु । मङ्गतराम ! पुत्रोद्वाहे द्रव्यं नैव ग्राह्यम् ।

मङ्गतरामः—अरे ! अलमुपदेशेन ! नन्वहं याचे । किन्तु किन्तुनामकस्य ग्रहस्य शान्त्यै तु तद्ग्राह्यमेव ।

(चिकित्सकः किमपि यन्त्रं स्पृशन्)

चिकित्सकः—मङ्गतराम, तत्कथय, विवाहः कयारीत्यानुमन्यते भवता ।

मङ्गतरामः—भो, पूर्वमेवोक्तम्, कन्याकुण्डल्यां किन्तुनाम्नो ग्रहस्य सत्ता भवति, तच्छान्त्यै लक्षमुद्रां नीत्वैव विवाहोऽनुमन्स्यते ।

चिकित्सकः—मङ्गतराम ! भवान्, समाजसेवी । तदलं युतकेन ।

मङ्गतरामः—भो ! सेवार्थमेव तदपेक्षितम् ।

चिकित्सकः—मङ्गतराम ! गुप्तचरविभागीयोऽहं निरीक्षकः । स तु तव सहायो दैवज्ञः मया पूर्वमेवनिगृहीतः । इदानीं त्वमपि निगृहीतोऽसि । युतकयाचनदण्डप्रक्रियया दण्ड्यस्त्वम् ।

मङ्गतरामः—(मनसि) अहह ! द्रव्यमपि न लब्धम्, तथा च वैपरीत्यमापतितम् । तत्किं करोमि ?

चिकित्सकः—मङ्गतराम ! आगम्यताम् ।

मङ्गतरामः—वत्स, भाग्यवति, विषमे खलु पतितोऽस्मि । तत्राहं रक्षोपायं पश्यामि ।

आशिषकुमारः—मीरा—निरीक्षकमहोदय ! क्षन्तव्योऽसौ ।

चिकित्सकः—मङ्गतराम, विधिस्त्वां न मोक्षयिष्यति ।

मङ्गतरामः—निरीक्षकमहोदय ! इदानीं भवदाधीनैव मे सम्मानरक्षा । तदर्थं भवदादिष्टं पालयिष्ये ।

(कन्यापालः प्रविश्य)

कन्यापालः—यद्येवं तदा मम पुत्र्याः सम्बन्धः त्वत्पुत्रेण सह सम्पाद्यताम् । अहं भवन्तं बन्धनान्मोक्तुं निरीक्षकं प्रार्थयिष्ये ।

(चिकित्सकः) निरीक्षकः—भवतु । यद्यपि दण्ड्योऽसौ किन्तु भवदनुरोधात् यथा कथञ्चिदेकमवसरं दास्यामि ।

मङ्गतरामः—(हस्तावुत्थाय) भवतु, स्वीकृतोऽसौ सम्बन्धः । न ग्रहीष्ये लक्षमुद्राः (पुत्रं प्रति) वत्स ! त्वमपि तथेत्यनुमन्यस्व ।

आशिषकुमारः—तथास्तु ।

मीरा—निरीक्षकमहोदय ! युतकं विनैव कन्यापालस्य पुत्र्याः विवाहः मम पुत्रेण सहाद्यैव सम्पद्यते । तत्क्षाम्यतु भवान् ।

निरीक्षकः—शोभनम्, गच्छामि, कन्यापाल ! विगतचिन्तो विवाहः सम्पाद्यः । (निर्गच्छति)

मङ्गतरामः—भगवन् !

षड्वर्गदोषपरिदूषितचित्तवृत्तिः,
क्षुद्रो हि जीवनिचयो विषयस्य दासः ।
नूनं त्वदीयकृपयैव विभावितात्मा,
सानन्दमच्युतपदं भजतीति जाने ॥२०॥

कन्यापाल, वत्स, भाग्यवति, विवाहस्य मङ्गलार्थं किन्तु-नाम्नो ग्रहस्य च निवृत्यर्थमिदं प्रार्थयामः ।

सर्वे—तथाऽस्तु । (सर्वे समुत्थाय)

(भरतवाक्यम्)—युतकयाचनतो विरतो जनो,

नवसमाजविधानविचक्षणः ।

जगति गौरवधामगरीयसी,

भवतु भूमिरियं मम भारती ॥२१॥

इति श्री हीरालालपाण्डेयप्रणीतं युतकयाचनं नाम (एकाङ्कि नाटकम्)
नाटकं समाप्तम् ॥

FORM IV

Particulars regarding "Journal of the Ganganatha Jha Kendriya Sanskrit Vidyapeetha" as required by the Registrar of News Papers

1.	Place of Publication :	G. N. Jha Kendriya Sanskrit Vidyapeetha, Chandrashekhar Azar Park, Allahabad.
2.	Periodicity of Publication :	Quarterly.
3.	Editors' Names and Nationality :	1. G. C. Tripathi, Indian. 2. (Mrs.) Maya Malaviya, Indian.
4.	Publisher's Name and Nationality :	G. C. Tripathi, Principal, G. N. Jha Kendriya Sanskrit Vidyapeetha, Allahabad, Indian.
5.	Printer's Name and Nationality :	Indian Press (P.) Ltd., Allahabad.
6.	Name and address of individuals who own the newspaper and partners or shareholders holding more than one percent of the total Capital :	Director, Rashtriya Sanskrit Sansthan (Ministry of Human Resources Development, Govt. of India), A-40, Vishala Enclave, Raja Garden, New Delhi.

I, G. C. Tripathi, hereby declare that the particulars given above are true to the best of my knowledge and belief.

Sd/- G. C. TRIPATHI
Publisher

अस्माकं नूतनानि प्रकाशनानि

मृद्वीका (डॉ० जगन्नाथपाठककृता)

"·····संस्कृतकाव्यपरम्परायां नवीनोऽयमुन्मेष इति मन्ये संस्कृत-भाषा, उषेव पुराणो युवतिः पुरन्धिस्तत एव सम्भवति प्रस्तुतः समाकल्पः। प्रसन्नगम्भीरेयं काव्यकृतिः सहृदयान विस्माययति, यतो हि नाद्यत्वे बहु दृश्यते ईदृक् प्रसाद इयच्चार्थगौरवम्। चित्तद्रुत्यात्मकस्य प्रेमव्यापारस्य वैलक्षण्यं क्षणे क्षणे नवत्वमेव, तत्कविना सञ्चारिवैविध्येनानुभाववैविध्येन वक्रोक्ति-वैविध्येन च सुचारु चित्रितम्।

डॉ० विद्यानिवासमिश्र·
उपकुलपतिः काशी विद्यापीठस्य

श्री परितोषमिश्रविरचिता अजिताख्या तन्त्रवार्त्तिकटीका (प्रथमो भागः) (डॉ० किशोरनाथझा प्रमुखैः सम्पादिता)

"तन्त्रवार्त्तिकं बहुविषयगर्भम्। तस्य न्यायसुधाख्य व्याख्यानमति विस्तृतं प्रसिद्धमेव। परं तु अति विस्तरोऽपि जामितापादकत्वात् नाकर्षति जिज्ञासूनां चेतः। अतः परितोषमिश्रकृता अजिताख्येयं व्याख्या अन्यूनानतिरिक्तविवरणरूपा अवलोकनमात्रेण सुमनसां मनः प्रह्लादयति। प्रतिपृष्ठं दर्शं दर्शं महान्तमानन्दमनुभवामि सम्पादकमहोदयैः महता अवधानेन सम्पादितोऽयं ग्रन्थः। अयं ग्रन्थः आलस्यमनापादयन् वार्त्तिकतात्पर्यावगमे नितरामुपकरोति। अक्षराणि सुदर्शनानि मुद्रणद्रोषः अन्विष्यमाणोऽपि नोपलभ्यते। पत्राणि समीचीनानि बन्धनं सुचारु। एकैकस्यापि विदुषः अलङ्काररूपोऽयं ग्रन्थो भविष्यति।

चिरात् सुषुप्तिमनुभूतवतोऽस्य ग्रन्थस्य प्रकाशपथे आनयनं कृतवतः सम्पादकान् प्रकाशकांश्च हृदयपूर्वकमभिनन्दामि"।

एन० एस० रामानुजताताचार्यः
प्राचार्यः, तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठस्य

पंजाबी-संस्कृत-शब्दकोश (डा० शिवकुमार मिश्र आदि द्वारा सम्पादित)

"पंजाबी की संस्कृतमूलकता कोई नई बात नहीं है। किन्तु जिस वैज्ञानिक शैली में इस कोश के माध्यम से इस सनातन सत्य का बोध कराया गया है वह अपने आप में अत्यन्त महत्त्वपूर्ण है।"

डॉ० रामकरण शर्मा
दिल्ली।

"This is a praiseworthy attempt in regard to simplification of Sanskrit teaching specially to learners of Sanskrit having Punjabi as their mother tongue. The book consists of those Sanskrit words which are still in use both in spoken as well as in written Punjabi language."

Dr. Sri Vidhata

Prof. and Head, Deptt. of Grammar and Linguistics, Kameshwer Singh Darbhanga Sanskrit University, Darbhanga.